Shri Raghunath Temple MSS. Library,
JAMMU

No. १२८१

Title नञ्वाद टिप्पनम्

Author म० म० गदाधर भट्टाचार्यः

Extent २८ Age —

Subject न्यायवैशेषिकम्

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नञ्वाद टिप्पनम्

१२८१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्याय

वनमर्थवादः लं०२११

५२०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

श्रीगणपतये नमः ॥ श्रीपरमेश्वरीं नौमि ॥ राधामुखाब्जप्रधुमज्ञमधुव्रतं श्रीकृष्णस्य पादयुगलं शिरसा प्रणम्य ॥ नव्यावादसंगतशिरोमणि
गूढभावं श्रीमान्गदाधरसुधीर्विशदीकरोति ॥ १ ॥ यद्यपि साहचर्यादयः षडन्न अर्थाः तदुक्तं तत्साहचर्यमभावस्तदन्यत्वं तदल्पता ॥
अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिता इति तथापि लक्षणयैव साहचर्याद्यर्थप्रयोगनिर्वाहे साहचर्याद्यर्थेपि शक्तिकल्पनं न युक्तं
॥ अभावमात्रं भावरूपार्थद्वये एव ॥ साहचर्यताद्यपेक्षया अभावत्वभेदत्वयोर्लघुतया प्रवृत्तिनिमित्तत्वे विनिगमकमतस्तादृशाशयेना
ह ॥ संसर्गाभावेति ॥ नञोऽर्थः नञ्पदवाच्यः संसर्गाभावे अभावत्वेनैव शक्तिः ननु तादात्म्यातिरिक्तसंसर्गाभावत्वरूपसंसर्गाभावत्वेन
गौरवात् तेन रूपेण बोधस्यानुभवासिद्धत्वाच्च ॥ अत एव तत्तादृशपदमभावस्यैति कोऽपाम भावत्वेनैव संसर्गाभावस्य उपादानं न तु संस १२
र्गाभावत्वेनान च संयोगादिरूपसंबंधावच्छिन्नप्रतियोगिताकत्वेनाभावमानानुपगमे भूतले न घट इत्यादिशाब्दबोधस्य संयो
गादिसंबंधेन भूतले घटादिविशिष्टबुद्धिविरोधित्वानुपपत्तिः तत्संबंधेन तद्विशिष्टबुद्धौ तत्संबंधावच्छिन्नप्रतियोगिताकत्वावगा
हिमाएताभावबुद्धेः प्रतिबंधकत्वादिति वाच्यं ॥ निरुक्तसंसर्गाभावत्वेन शक्तावपि तादात्म्यातिरिक्तसंबंधत्वेनानुगतरूपेणैव संसर्गा राम॰
भावत्वग्रहे संयोगादीनां विशेषतः नञ्पदशक्त्याविशिष्टसंयोगादिसंबंधावच्छिन्नप्रतियोगिताकत्वालाभात्तादृशशाब्दबोधस्य

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

क्तविशिष्टबुद्धिविशेष्यित्वानुरोधेनाकाशादिवल्लाघवत्ताद्दशप्रतियोगिताकत्वस्य विशिष्यप्रतियोग्यभावयोः संबंधविधया भानस्योपगं
तव्यत्वात् ॥ भूतले न घट इत्यादिवाक्यजन्यबोधे कदाचित्संयोगावच्छिन्नप्रतियोगिताकत्वं कदाचित्समवायावच्छिन्नप्रतियोगिताकत्वं
भासत इत्यत्र तत्तत्संबंधतात्पर्यमेव नियामकं ॥ संयोगेन घटो नास्तीत्यादौ संयोगेनेत्यादितृतीयान्तार्थः संयोगाद्यवच्छिन्नप्रतियोगिताकत्वं
प्रकारतयापि भासते ॥ अथ संयोगादिसंबंधावच्छिन्नघटत्वावच्छिन्नाभावस्य समवायसंबंधावच्छिन्नघटसंयोगाभावसमनियततया तादृशभिन्न
त्वेन कपाले समवायेन घटो नास्तीत्यादिप्रत्ययापत्तेः न च तत्तृतीयार्थोऽवच्छिन्नत्वमेव तत्संबंधघटत्वावच्छिन्नप्रतियोगिताभ्यामन्वयान्नायमति
प्रसंग इति वाच्यं ॥ घटत्वावच्छिन्नप्रतियोगितायाः संसर्गतया तत्र पदार्थस्य प्रकारतया अन्वयासंभवादिति चेन्न ॥ तृतीयान्तार्थसमवायाव
च्छिन्नप्रतियोगिताकत्वघटपदार्थघटत्वविशिष्टयोरेकविशिष्टेऽपरवैशिष्ट्यमिति मायेनाभावांशेऽन्वयबोधस्वीकारेणानुपपत्तिवि
रहात् ॥ अथाभावत्वस्यान्योन्याभावसाधारणस्य प्रवृत्तिनिमित्तत्वेऽन्योन्याभावे पृथक्शक्तिकल्पनमनर्थकं ॥ न चान्योन्याभावत्वप्रकार
कबोधानु [redacted] रोधेन तत्र शक्त्यन्तरकल्पनमावश्यकं ॥ अन्यथा तादात्म्यसंबंधेन प्रतियोगिप्रकारक
अयं घट इत्यादिबोधेनायं घट इत्यादिवाक्यजन्यबुद्धेः प्रतिबंधकत्वापातात् ॥ अन्योन्याभावत्वावगाहिबुद्धेरेव तथाविधबोधविरोधित्वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२ तदन्यथा अयं घटाभाववानित्यादिवुद्धेरपितादृशबोधविरोधित्वापातादिति वाच्यं अभाववत्वस्य न अपदर्शजन्यतातादात्म्यसंबंधावच्छिन्नप्रतियोगि

ताकत्वस्य समानविभक्तिकानुयोगिप्रतियोगिवाचकपदस्समभिव्याहाररूपाकांक्षावलेन वलाभात् तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्व

रा रूपाऽन्योन्याभावत्वलाभे नैतेन रूपेनाशंककरकिंचित्करत्वात् नेत्वनास्यैवान्योन्याभावे पृथक्शक्तिः संसर्गाभावान्योन्याभावयोर्द्वयोर्विशेषयोः पृ

रा थग्रूपाद्यानं अभावसामान्यस्य नञ् अपदार्थत्वलाभापत्त्या यत्तत्पव्यतिरेकनिश्चयपाविसत्र विशेषवद्धीपावासं व्यतिरेकज्ञानसामान्यप्रतिबंधकता

त्वलाभोपेतिवाच्यं पृथक्शक्तिं विना नञर्थः घटिस्य सामान्यसंगतेरिदं वरित्वात् इतीति चेन्न। अस्मादेवं घटो न घटोऽन्योन्याभावत्वं तादात्म्यसंबंधावच्छिन्नप्रतियोगि

ताकत्वरूपं अभावे तदेव न संयोगादितादात्म्यस्य संयोगादिरूपत्वपा संयोगादिसंबंधावच्छिन्नसंयोगप्रतियोगिताभावस्य अन्योन्याभावत्वापत्तेः। अ

पितु अनुयोगिताविशेष एव। एवं च तादात्म्यस्यान्योन्याभावप्रतियोगितावच्छेदकसंबंधत्वमप्रामाणिकं इह संयोगेन घटो नास्तीति वत् अयं ता

दात्म्येन न घट इत्यादिप्रयोगात्॥ एवं च तादृशानुयोगिताविशेषप्रकारकत्वमेवाभेदसंबंधे नप्रतियोगिप्रकारकधीविरोधित्वे तंत्रं। तथा चैतन

रूपेणाखण्ड्य कृशक्तिकल्पनं तत्प्रकारकबोधात् रोधेनावश्यकं। नञ्वाभाववत्वावच्छिन्नप्रतियोगिसंवधविधया अन्योन्याभावत्वरूपविलक्षणा रम०

नुयोगितायाभानेऽभेदाभेदसंसर्गकप्रतियोगिप्रकारकधीविरोधित्वे तंत्रमस्तु। तथा चाभाववत्वविशिष्टशक्तेनैवोपपत्तौ किं भेदे शक्त्यंतरेणेति वा २

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

चं पतो नायं घट इत्यादौ घटत्वावच्छिन्नस्य घटत्वावच्छिन्ननिरूपितत्वसंबंधेनानुयोगिताविशेषभेदस्तायंशे भानमावश्यकं ॥ अनुयोगितायाः
वप्रतियोगिविनिर्मोकेन प्रसंक्ष अभानात् अभावस्य च इदंत्वादिनापि भानात् प्रतियोग्यनुयोगेगेरौ व भानमित्यनियमात् ॥ एवं चाभावे धर्मिणि प्रतियो
गिनः प्रकारत्वं तत्रापि प्रागुक्तमित्यनुयोगिताशे प्रतियोगिप्रकारत्वमेव प्रतियोगिप्रकारकधीविशेषितत्वं तथाच भेदत्वरूपानुयोगिताविशिष्टे श
क्त्यंतरमावश्यकं तत्तद्देतरे रागानुयोगिता प्रतियोगिनोः अन्वयांशे भवादिसाधारणः ॥ कृतजनवस्तुन अपरत्वमप्रातिपदिकार्थाभावान्वयबोधे सप्तमीसम
भिव्याहारज्ञानं हेतुः ॥ तत्र नामार्थयोर्नाभावबोधे समानविभक्तिकनामपदसमभिव्याहारज्ञानं तथेति युक्तं नि भेदस्य च नायं घट इत्यादावभिधानं ननु शक्ति
भेद इत्यादुः ॥ ननु इह घटो नं अयं घटो न इत्यादौ घटादेरभावे प्रतियोगित्वया न्वयेपि घटत्वादेः प्रतियोगितावच्छेदकत्वभानं विना तादृशबोधानुत्पत्त्या शाब्दबुद्धीनां रा
घटत्वादिविशिष्टघटादिविशिष्टधीविशेषितत्वानुपपत्तिः इह घटपटौ न स्त इह पटो नास्ति नायं नील घट इत्यादिबुद्धीनां घटत्वावच्छिन्नविशिष्टबुद्धिवि
रोधितया तद्विशिष्टबुद्धिविरोधितायां शुद्धघटत्वावच्छिन्नप्रतियोगितावगाहितायाः प्रयोजकत्वात् ॥ न चाभावांशे शुद्धघटत्वावच्छिन्नप्रकारकत्वेन
उपदर्शितबुद्धिविरोधिताप्रयोजिका न तु तादृशप्रतियोगिताकत्वावगाहितेति वाच्यं ॥ अभावस्य तद्रूपावच्छिन्नवत्ताधीविरोधित्वप्रयोजकं तद्रूपावच्छि
न्नप्रतियोगिताकत्वं तत्त्वावगाहित्वमनादृत्य तद्रूपावच्छिन्नप्रकारतामात्रेणाभावबुद्धेः प्रतियोगिमत्ताधीविरोधितासंभवात् घटो नास्तीति ज्ञाने शुद्ध

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

३
3

घटत्वावच्छिन्नप्रतियोगितानवगाहित्वेऽपि तस्या घटस्याभावत्वात् बुद्धिविरोधित्वे नीलघटत्वावच्छिन्नवत्ताबुद्धेः शुद्धघटत्वावच्छिन्नाभाववत्ताबुद्धिविरोधि
त्वापत्तौ नीलघटो नास्तीति ज्ञानस्यापि अधिकं तु प्रविष्टं न तु तद्धानिरिति मायेनन्न हि रोधित्वो विसेनतस्याः तेन विरोधित्वं न तु घटो नास्तीति बुद्धेरिति वि
शेषानुपपत्तेः। एवमुक्तस्थले घटत्वादेः प्रतियोगितावच्छेदकत्वाभाने वक्ष्यमाणरीतिप्रसंगोऽपि दुर्वारः। तत्स्थानं च न पदार्थविषयाउक्तवाक्ये तदुपस्था
पकाभावात् इति कश्चन्तदित्याकांक्षायामाकांक्षाबलात् प्रतियोग्यभावयोः संबंधघटकतया तज्ज्ञानमित्याह न्चेति।। तत्र न अर्थे संसर्गभावेभे त
देव अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वमिति।। येन रूपेण प्रतियोगिनो अभावांशे विशेषणता तद्धर्मपर्या स प्रतियोगितावच्छेदकता
कत्वमित्यर्थः। उक्तन्निवल लभ्यमिति।। अपरार्थोऽपि तद्रूपावच्छिन्नोऽप्यस्थापकशब्दविशेषसमभिव्याहाररूपाकांक्षाबलात्प्रतियोगिसंसर्गतया
लभ्यमित्यर्थः। घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वं घटत्वाद्यवच्छिन्नप्रतियोगितानिरूपितत्वविशेषितानुयोगिता। सा च घटादिरूपविशेषणा
प्रतियोगिकेति तत्संबंधतया भासते।। अनुयोगितायां दर्शितविशेषणांशे संसर्गतावच्छेदकतया भासते न अपरार्थितावच्छेदकानुयोगितायां घटा
देरन्वयोपगमे तु तत्र ताहशप्रतियोगितानिरूपितत्वमेव संबंधः। घटादिनिष्ठप्रतियोगिताप्रतियोगिकं निरूपकत्वं घटादिरूपप्रतियोगिप्रति राम०
योगिकमपि इति तत्स घटादिसंबंधता।। केचित्तु अभावे घटादिसंबंधो अनुयोगितात्मसंसर्गतया भासते। घटादिपारतंत्र्येण घटस्यादिरपि अभा ३

त्वविशेषणतया तत्संबंधः स्वावच्छिन्नप्रतियोगिताकत्वं अनुयोगितायां घटाघटान्यपक्षेऽपि तत्सत्त्वात् घटादिव्यावृत्तं भेदगर्भत्वादिरप्यन्ययोगे
ष्य॰॥ सर्वत्रैव विशिष्टवैशिष्ट्यबोधे ईदृशरीतिरनुसर्तव्या॥ एवं च कंबुग्रीवादिमत्त्वादेर्गुरुतया अनवच्छेदकत्वपक्षे कंबुग्रीवादिमत्त्वावच्छिन्न
प्रतियोगिताया अप्रसिद्धावपि न क्षतिः। अवच्छिन्नप्रतियोगिताकत्वस्य कंबुग्रीवादिमत्त्वस्य च स्वत्वं तु शशः प्रसिद्धैव तादृशसंबंधेन तत्सविशेषणता
संभवात् तन्न वान्वयितावच्छेदकावच्छिन्नत्वविशेषितप्रतियोगितायाः संबंधप्रवेशपक्षेऽपि विशेषणविशेष्ययोः स्वत्वस्याप्रसिद्ध्या विशेषणविशेष्यभावेन
संबंधतानिर्वहतीति वाच्यम्। एवं सति तादृशतुच्छे भ्रमत्वासंभवात्। तथा हि तादृशज्ञानेन विशिष्टसंबंधेनाभावांशे प्रतियोगिगोचरभ्रमः विशिष्ट
संबंधाप्रसिद्ध्या तत्संबंधावच्छिन्नाभावस्याप्यप्रसिद्धेः तत्संबंधावच्छिन्नाभाववतीसादेः तत्संबंधघटितभ्रमत्वस्य दुर्निरूपत्वात् तज्ज्ञानं प्रतियोगितायां क
म्बुग्रीवादिमत्त्वावच्छिन्नत्वभ्रमः तदवच्छिन्नत्वप्रसिद्धिस्तु विषयितासंबंधावच्छिन्नतद्विशिष्टाभावस्य घटत्वादिविशिष्टाभावात्मकनियततत्सप्रतियोगि
तायां द्वित्वनियामकतया विषयितायाः अभावप्रतियोगितावच्छेदकसंबंधत्वविरहेऽपि तेन संबंधेन तद्विशिष्टवद्वृत्तिप्रतियोगितावच्छेदकतायामि
त्यपि न। भ्रमत्वस्य प्रकारताघटितत्वेन संबंधतावच्छेदकीयविषयतायां विशेषणतानापेक्षायां प्रकारतात्वसंभवेन तदंशे भ्रमत्वासंभवा
त्। यत्तु तद्रूपावच्छिन्नप्रतियोगितावच्छेदकसंबंधताकतदभाववत्तितद्रूपेण तत्संसर्गकतत्प्रकारकज्ञानं तद्रूपावच्छिन्नतत्संबंधेन तद्भ्रमः। विशि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

४ संबंधाप्रसिद्धिस्थलेपिव्यधिकरणात्तद्रूपावच्छिन्नप्रतियोगितावच्छेदकसंबंधताकाभावप्रसिद्ध्यातादृशाभावमादाययत्तद्रूपावच्छिन्नतत्संबंधेनप्रम
त्वनिर्वाहात्। कंबुग्रीवादिमान्नास्तीतिज्ञाने कंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगितानिरूपितत्वादिविशेषितानुयोगितासंबंधेनप्रतियोगिनएवप्र
५ मः। व्यधिकरणधर्मावच्छिन्नाभावःप्रतियोगितावच्छेदकविशिष्टप्रतियोगिताज्ञस्याभावधीहेतुतयातादृशकारणाबाधेनतादृशप्रतीत्यसंभव इ
तियुक्त्याप्रमाणिकारेणखंडितः व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकसंबंधताकाभावखंडनंतुतादृशीसानसंभवतीतिविशिष्टसंबंधा
वच्छिन्नाभावबुद्धौविशिष्टसंबंधज्ञानस्याहेतुत्वादिरितितदपिनसत्। तादृशाभावस्यअनभ्युपगमात्। अथस्वावच्छिन्नप्रतियोगिताकत्वसंबंधे
नप्रतियोगिविशेषणस्यप्रतियोगिविशेषणाभावांशेप्रकारतोपगमेपीतघटादिमतिनीलोघटोनास्तीतिबुद्धेरनुपपत्तिः। स्वावच्छिन्नप्रतियोगि
ताकत्वस्यस्वपर्याप्तप्रतियोगितावच्छेदकताकत्वरूपतयानीलघटत्वावच्छिन्नाभावेघटत्वादेर्विशेषणस्यतादृशसंबंधविरहात्। नहितादृशा
भावप्रतियोगितावच्छेदकताघटत्वादेपर्याप्तानीलत्वादावपितस्यप्रतियोगितावच्छेदकत्वसत्वात्। घटादिमात्रमात्राभावस्यचतादृशसंबंधेनघटत्वा
दिसंबंधिनःपीतघटादिमत्यपिसत्वात्। अतोनीलसहितघटत्वादिरूपप्रतियोगिताविशेषणधर्मपर्याप्तप्रतियोगितावच्छेदकताकत्वंप्रतियो एम०
गिसंबंधएवस्वपदपमितिचेन्न। नीलोघटोनास्तीत्यादौनीलादिसहितस्वपर्याप्तप्रतियोगितावच्छेदकताकत्वस्यघटत्वादिसंबंधतोपगमेनसामंजस्यात् ४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नचस्वपदार्थस्यसंबंधिनो घटत्वादेः संबंधघटकत्वे न नीलादिमहिम्नि तेन घटत्वादेः घटत्वादिसंबंधघटकत्वासंभवात् । नीलादिमहिम्नि घटत्व
पर्याप्तप्रतियोगितावच्छेदकधर्मघटत्वादिसंबंधितेति वाच्यं । अगत्या अन्यसंबंधिनोपि संबंधघटकत्वोपगमादिति वदंति ॥ तन्न कंबुग्रीवादिमान्ना
स्तीत्यादौ कंबुग्रीवादिमत्त्वादौ प्रतियोगितावच्छेदकत्वपर्याप्तिमान्नस्यावश्यकतया स्वपर्याप्तप्रतियोगितावच्छेदकताकत्वमेवाभावे तत्संबंध इत्यु
पेयं । तदर्थश्च स्वभिन्नधर्मानवच्छिन्नप्रतियोगिताकत्वं तत्र च स्वपदार्थस्य कंबुग्रीवादिमत्त्वादेःरनिवेशो न संभवति । भिन्नत्वस्य केवलान्वयित्वा
द्यवच्छिन्नप्रतियोगितानिरूपितत्वविशेषितानुयोगितायाः प्रतियोगिसंबंधतयाभानमतेपि नानुपपत्तिः । यादृशसंबंधे यद्रूपावच्छिन्नत्वप्रतियो
गित्वयद्धर्मावच्छिन्नानुयोगिताकत्वानां त्रयाणामभावः तद्रूपविशेषिततत्संबंधेन तत्प्रकारकतद्धर्मिविशेष्यकज्ञा[illegible]द्रूपावच्छिन्नत्वतत्संबंधेन तत्स
+त्वभिन्नधर्मानवच्छिन्नत्वस्याप्रसिद्धेः तन्निवेशाच्च संबंधाप्रसिद्धिः ईर्वारैवेतिवक्ततः कंबुग्रीवादिमान्नास्तीतिबुद्धौ कंबुग्रीवादिमत्त्वा+त्वस्वर्मि
ष्ठाभ्रमइति भ्रमत्वनिरुक्तातादृशबुद्धेः कंबुग्रीवादिमत्त्वाद्यवच्छिन्ननिरूपितत्वविशेषितप्रतियोगितासंबंधेन प्रतियोगिभ्रमत्वोपपादनसंभवा
त् । तद्धर्मावच्छिन्ननिरूपितत्वं च विषयितादौ प्रसिद्धं । संबंधधर्मिकोभयाद्यभावघटितं च भ्रमत्वमवश्योपेयं । अन्यथावृत्त्यनियामकसंबंधस्य
अभावप्रतियोगितानवच्छेदकत्वेन तत्संबंधेन तस्याभाववतितेन संबंधेन तत्प्रकारकत्वमिति भ्रमत्वनिर्वचनासंभवात् । तथानिर्वचनेहृसनिनि

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

५ पामकसंबंधावछिन्नाभावात्मसिध्यानसंबंधावगाहिभ्रमत्वासंग्रहान्नतेनसंबंधेनतद्व्यभिरेकहिनैवमोद्यभिकरणसंबंधेनभ्रमासंग्रहात्। एवंच
स्वसमवायिसंयोगासंबंधेनस्फटिकविशेष्यकलोहित्यप्रकारकभ्रमायामतिव्याप्तिवारणाय प्रकारेस्यसमानत्वमुक्तम् तिविवोस्त्रनुसंधेयः। कंबु
ग्रीवादिमात्रास्तीतिवाक्यस्यप्रमापामाण्यापत्तेरन्यथानुपपत्त्यागुरुधर्मस्यप्रतियोगितावच्छेदकत्वमावश्यकम् अन्यथानीलोघटोनास्तीत्यादिवा
क्यस्याप्रमाण्यंपस्यात्। तत्राभेदसंबंधेननीलरूपादिमतोऽस्त्वन्यपितावच्छेदकत्त्वानेनसंबंधेनतस्यप्रतियोगितावच्छेदकत्वसंयोगोरवेणासंभ
वात्। समवायादिनानीलरूपादेरवच्छेदकत्वेलाघवात्। नचस्वन्यपितावच्छेदकविशिष्टव्यापकतावच्छेदकावछिन्नप्रतियोगिताकत्वमेवसं
बंधोवाच्यः कंबुग्रीवादिमत्त्वादेरभावप्रतियोगितानवच्छेदकत्वेपितद्विशिष्टव्यापकतावच्छेदकघटत्वावछिन्नप्रतियोगिताकत्वप्रसिध्यानोक्त
वाक्यप्रामाण्यानुपपत्तिरितिवाच्यं गुरुधर्मस्यप्रतियोगितानवच्छेदकत्वेकंबुग्रीवादिमत्त्वादिघटिततद्विशिष्टत्वविशिष्टाभावप्रतियोगितावच्छेद
कत्वस्यगुरुत्वयात्स्वावछिन्नाभावरूपव्यापकतावच्छेदकत्वाप्रसिध्याव्यापकतावच्छेदकत्वशरीरेप्रतियोगितानांविघ्नोपस्थितपातत्वप्रतियो
गितावच्छेदकत्वतावछिन्नाभावकूटस्यवह्वितरेयतत्त्वयात्तस्यशाब्दबोधविषयत्वासंभवात्। प्रस्स्यात्मकविशिष्टबुद्धौसंसर्गोपस्थितेरनपेक्षितत्वे ग्मु०
पिशाब्दबोधेसंसर्गतात्पर्यज्ञानसहितत्तथासंसर्गोपस्थितेरवापेक्षणात्। तथाहिघटमानयेत्यादौद्वितीयांककर्मत्वविशेष्यकद्धाधेयतासंसर्गक ५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

घटप्रकारकप्रतीतिपरं इत्याकारकस्यैव संसर्गतात्पर्यज्ञानस्य हेतुता वाच्या तत्र चाधेयत्वप्रकार एव न तु संसर्गः। न च तत्रापि आधेयत्वसंबंधतैव विषय-
ता तथा च इदं वाक्यं घटवत्कर्मत्वप्रतीतिपरं इत्याकारकज्ञानमेव हेतुरिति वाच्यं तादृशवाक्यार्थस्याप्रवृत्त्या शाब्दबोधात्मकज्ञानस्यासंभवात्। कथं-
चित्तं प्रवेऽपि शब्दस्यानुवादकतापत्तेः। घटेव इदं स्वावं घटवत्प्रतीतिपरं इत्याकारकमेव संसर्गतात्पर्यज्ञानं हेतुः प्रतिसंसर्गविषयाभासमानघट-
संबंधः स निष्ठ आधेयत्वसंबंधावच्छिन्नप्रकारतानिरूपितकर्मत्वनिष्ठविशेष्यताकत्वमेवेति आधेयत्वस्याप्रकारतया न तज्ज्ञानापेक्षा न वा शब्दस्या-
नुवादकतेति मम मते तथापि तद्धर्मावच्छिन्नप्रकारकबुद्धौ तद्धर्मांशे स्वरूपसंबंधरूपप्रतियोगितावच्छेदकतावगाहिस्वभावबुद्धेरेव लाघवेनानुभव-
वत्त्वेन न च विरोधित्वात्। कंबुग्रीवादिमान्नास्तीति वाक्यजन्यबुद्धेः कंबुग्रीवादिमत्त्वांशे तादृशप्रतियोगितावच्छेदकतानवगाहित्वेन तस्याः कंबुग्रीवादि-
मत्त्वावच्छिन्नविशिष्टधीविरोधित्वानुपपत्तेश्च अन्वयितावच्छेदकतावयत्र किंचित्तद्रूपावच्छिन्नत्वात्तत्र तद्रूपविशिष्टावच्छिन्नप्रतियोगिताकत्व-
मभावे भासते अतो घटत्वादिरूपसकलासमवच्छिन्नाभाववति पटत्वादिरूपापरजात्यादिविशिष्टवति जातिमान्नास्तीति वा सममभागात तद्देशजाति-
लाघुप्रत्ययसमाविच्छिन्नाभाववत्त्वेऽपि तद्विशिष्टावच्छिन्नाभावसत्त्वात् तद्विशिष्टावच्छिन्नाभावस्य च अवच्छेदकविशेषणधर्मान्तर्भावेण पर्याप्तप्र-
तियोगितावच्छेदकताकः तद्विशेषणावच्छिन्नप्रतियोगितावच्छेदकताको वा अभावः। येन संबंधेन यस्मान्वयितावच्छेदकता यत्र तत्र तत्संबं-

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्यावच्छिन्नमेव प्रतियोगितावच्छेदकत्वं तत्त्वभावे तत्तन्न विषयितासंबन्धेन गुणत्वावच्छिन्नप्रतियोगितावच्छेदकताकाभाववत्त्वविति घटो दोषगुणो
6 नास्तीति वाक्यस्याप्रामाण्योपपत्तिः प्रमेयवान् गुणत्वविशिष्टवाचकगुणादिपदघटितेन समवायसंबन्धेन तदवच्छिन्नस्यान्वयबोधात् विषयितादेस्तत्रा
न्वयितावच्छेदकतानवच्छेदकत्वात् अन्यथा घटत्वेन पटो नास्तीति बुद्धौ व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकोऽभावः प्रतीयेत इति सोऽस्वलभत
स्यान्वयितावच्छेदकस्य प्रतियोगितावच्छेदकतया भानं नियमेन संभवति तत्र प्रतियोगितावच्छेदकतया भासमानस्य घटत्वादेरन्वयितानव
च्छेदकत्वात् न च तत्र तत्तत्पदार्थवैशिष्ट्यं तस्य च प्रतियोग्यन्वयोपगमात् । घटत्वादेरभावांशेऽन्वयितावच्छेदकत्वेनिरवावधत्वे तस्य प्रतियोगि
विशेषणवैशिष्ट्यविशेषणत्वेऽपि वैशिष्ट्यप्रकारतं त्रेणप्रतियोगिमपि विशेषणत्वोपगमात् इति वाच्यं तथा सति प्रतियोगिन्यव्याधितधर्मस्य त
दंशे प्रकारतया बोधकत्वेन तद्वाक्यस्याप्रामाण्यापत्तेः । एवं व्यधिकरणधर्मस्य प्रतियोगिनि प्रकारतोपगमेऽपि स्यान्वयितावच्छेदकतानव्यधि
करणधर्ममात्रपर्याप्तत्वेऽपि तु समानाधिकरणधर्मे तन्मात्रे वा तथा च समानाधिकरणधर्मस्य तत्र प्रतियोगितावच्छेदकत्वेन तदभावादन्वयि
तावच्छेदकतापर्याप्त्यधिकरणपर्याप्तप्रतियोगितावच्छेदकत्वमेवासंभवः न चान्वयितावच्छेदकैकदेशपर्याप्तप्रतियोगितावच्छेदकताकत्वमोऽप ६
मास्तीत्युपगमसंभवः तथा सति घटसामान्याभाववत्तासंबन्धेनापि नीलघटो नास्तीति प्रयोगापत्तेः तद्धर्मांशे प्रतियोगितावच्छेदकत्वप
CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

योभिमानेतद्धर्मपर्याप्तान्वयितावच्छेदकताकबोधसामग्र्यपेक्षायाश्चावश्यकत्वात्। नन्वेतावतैव कार्यं घटसामान्याभाववत्तासिद्धेस्तथा
प्रयोगापत्तिवारणं। शुद्धघटत्वादिपर्याप्तप्रकारतावच्छेदकताकबोधे मादृक्सामग्र्या घटो नास्तीति वाक्यघटितायाश्च विकल्पसादृश्या
भावे नीलो घटो नास्तीति प्रयोगस्थलेपि सत्त्वादिति वाच्यं। आकांक्षासत्त्वात् ईदृशान्वयबोधे पदार्थान्तरविशेषितस्यार्थान्वयपरत्वेनाग्रहमा
णपदजन्यघटत्वावच्छिन्नोपस्थितेः शुद्धघटत्वावच्छिन्नप्रकारताकबोधहेतुत्वमुपगम्य दर्शितस्थले तादृशबोधसामग्र्यभाववत्त्वोपपा
दनीयत्वात्। न च पञ्चनञर्थेतत्तीयपीतेन घटत्वावच्छिन्नप्रतियोगिताकत्वं प्रकारतया न प्रत्याय्येत तत्त्वेनान्वयितावच्छेदके प्रतियोगिता
वच्छेदकत्वस्य संसर्गघटकतया भानमिति वाच्यम्। घटत्वेन पटो नास्तीत्यादौ घटत्वाद्यवच्छिन्नप्रतियोगिताकत्वं तत्त्वोपपत्त्याश्चाभावप्र
कारकतया प्रत्यायनमिति अन्वयितावच्छेदकघटत्वादिकमुपलक्षणतयैव भासतेऽन्यत्र समानाधिकरणधर्मस्यव्याधिकरणधर्माव
च्छिन्नाभावप्रतियोगितानवच्छेदकत्वेपि न क्षतिरिति वाच्यं। प्रतियोगित्वमुपलक्षणतयापि उक्तस्थले अन्वयितावच्छेदकमानोपगमे घट
त्वनीलघटत्वादिना पीतघटाद्यभावमादाय घटत्वेन घटो नास्तीति व्यवहारस्य सत्त्वप्रसङ्गः सर्वथा पर्याप्तप्रतियोगितावच्छेदकतायाः स्वी
यार्थात्वमुपगम्य घटत्वेन समं घटत्वपर्याप्तप्रतियोगितावच्छेदकताकत्वं तया नीलघटत्वाद्यवच्छिन्नाभावे तदबाधेन वारणसंभ

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

7

वेपिघटत्वावच्छिन्नप्रतियोगिताकद्रव्यत्वाद्यपर्याप्तत्वघटाभावमादाय घटवति घटत्वेन द्रव्यं नास्तीति व्यवहारस्य दुर्वारत्वात् । न च तत्तीयपाक्षमपि
व्याप्तताभावान्वयितावच्छेदकरूपव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वमेव वोध्यम् इति घटत्वस्य द्रव्यत्वाव्याधिकरणत्वयानतथाप्रयोग इति वा
च्यम्प्रवच्छेदकस्य वास्तवं वैयधिकरण्यविवक्षणे घटत्वद्रव्यत्वयोर्वैयधिकरण्यभ्रमदशायां घटत्वेन द्रव्यं नास्तीति वाक्याधीनबोधानुपपत्तिः । व्यधि
करणत्वेन ज्ञायमानत्वविवक्षणे तु तादृशायां घटत्वावच्छिन्नप्रतियोगिताकत्वेन पराभावबोधतयापातद्वाक्यस्याप्रामाण्यापत्तिः । न च तद्वाक्यस्य घटत्वे
द्रव्यसत्त्वव्यधिकरणत्वबोधकत्वेन प्रामाण्यप्रसंग इति वाच्यं तत्र भाव्ये वैयधिकरण्यपरार्थत्वस्य तद्वाक्यार्थत्वस्य चाभावेन तद्वाक्यतोबोधासंभ
वात् । वस्तुतोऽस्तु घटत्वघटत्वावच्छिन्नद्रव्यादिमादाय घटवति घटादिरूपदेशे तथा व्यवहारस्य वैयधिकरण्यभानमप्युक्ततरं । न च तत्तीयान्तेन यत्र
घटत्वावच्छिन्नप्रतियोगिताकत्वं तत्र भावे बोध्यते तत्रान्वयितावच्छेदकव्यापकप्रतियोगिताकत्वस्य वंशतया भानं तत्र इत्युपेयं तथा च घटत्वेन घटत्वाव
च्छिन्नपराभावमादाय न तथा प्रयोगप्रसंगः तादृशाभावप्रतियोगिताया इव व्याप्यकत्वादिति वाच्यं एवमपि यत्र घटत्वावच्छिन्नघटाघटोभया
भावमादाय घटत्वेन घटाघटोभयं नास्तीति तत्र घटत्वस्य देशे घटत्वेन प्रमेयं नास्तीति व्यवहारापत्तेः दुर्वारत्वात् तादृशाभावप्रतियोगितायाः स्वकत्व एम०
मेयवृत्तित्वात् तावच्छेदकत्वादित्याद्यधिकरणधर्मावच्छिन्नाभावस्य व्यधिकरणधर्मावच्छिन्नप्रतियोगिविशेषणतया भासमानः समानाधिकरणधर्मोऽपि प्रति

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

योगितावच्छेदकः। अत एव घटत्वेन घटपटोभयं नास्तीत्यादिप्रतीतिविषयाभावस्य प्रतियोगितायाश्च व्यासज्यवृत्तित्वेऽपि व्यधिकरणधर्मावच्छिन्नप्र
तियोगिताकत्वनिर्वाहः। घटत्वादेः तत्प्रतियोगितासमानाधिकरणत्वेऽपि प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणस्य घटत्वादिसहितस्य घट
पटोभयत्वादेः प्रतियोगितानधिकरणघटपटयोरपर्याप्तेरिति। यद्यपि पटनिष्ठप्रतियोगिताया व्यधिकरणघटत्वावच्छिन्नत्वेनैव तदभावस्य व्यधिक
रणधर्मावच्छिन्नप्रतियोगिताकत्वनिर्वाहः तथापि तदभावस्य केवलान्वयित्वानुपपत्तिः। प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्ट
प्रतियोगिनिरूपिताधिकरणत्वाप्रसिद्ध्या अभावस्य विरोधात्। घटत्वविशिष्टं जलं नास्तीत्यादृशाभावस्य केवलान्वयित्वप्रसंगात्। अत्र स्वमते च व्यासज्यवृत्तितदभावप्र
तियोगितावच्छेदकतापर्याप्त्यधिकरणघटत्वपटत्वविशिष्टाप्रसिद्ध्या तयोरधिकरणाप्रसिद्ध्या तादृशाभावविरोधित्वाधिकरणतायाश्चाप्र
सिद्ध्या तस्य केवलान्वयित्वनिर्वाहः। न च गतत्वानुरोधेन वह्नित्वविशिष्टाधिकरणतावति पर्वतादौ महानसीयवह्नित्वावच्छिन्नाभावसत्त्वानुरोधेन च प्र
तियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मविशिष्टनिरूपिताधिकरणत्वेऽपि वक्तव्यं चेत् तदभावस्य विरोधः। तदा घटपटोभयं नास्तीति प्रतीतिविषयघ
टपटोभयत्वावच्छिन्नाभावस्यापि केवलान्वयित्वप्रसंगः। तथा हि तादृशाभावस्य प्रतियोगितावच्छेदकतापर्याप्तिर्न उभयत्वमात्रे केवलघटत्वादे
वापि। किं चित्तु उभयत्ववति केवलघटादिप्रतीतिवत्तादृशाभावस्याप्यत्वप्रसंगात्। तन्नापि घटपटवृत्तित्वविशिष्टं इत्येतादृशविशिष्टस्यानुपस्थितेर्न तथा प्रती
त्यनुदयप्रसंगात्। अपितु अपन्ने तद्धर्मितावच्छेदकतापन्ने घटत्वपटत्वे चेति वाच्यं। स प्रतियोगितावच्छेदकतापर्याप्तिर्यदि शितादृशपर्याप्तिनिरूपक

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

८ त्वावच्छेदकताकाधिकरणतया सममभावस्य विरोधात्तथा घटपटौ नेति प्रतीतिसाक्षिकद्वित्वत्वधर्मितावच्छेदकतापन्नघटत्वपटत्वसमुदा
४ यपर्याप्तनिरूपकतावच्छेदकताकाधिकरणतावृत्तित्वस्य घटपटौ न स्त इति प्रतीतिसिद्धतादृशसमुदायपर्याप्तप्रतियोगितावच्छेदकताकाभा
वास्तत्वात् तादृशाभावस्य केवलान्वयित्वप्रसंगविरहात् किं च तत्तदभावप्रतियोगित्वमगसाध्यासद्वृत्तित्वोक्तिप्रतीतात् तथा च पर्याप्तिधर्मावच्छिन्नप्रति
योगितायाः पर्याप्तिः प्रतियोगितावच्छेदकविशिष्टसत्त्वस्वच्छिन्नसैव च अभावविशेषितयानसमानाधिकरणधर्मस्य प्रतियोगितावच्छेदकत्वं
विना तादृशाभावस्य केवलान्वयित्वानुपपत्तिरित्याहुः उभयाभावप्रतियोगितावद्विशिष्टाभावप्रतियोगित्वमपि व्यासज्यवृत्तित्विमीकार्यं एत
येनास्तीत्यादिविशिष्टाभावप्रतियोगितापर्याप्त्यधिकरणं उ पटत्वोभयपर्याप्तिस्वरूपत्वादिपर्याप्तप्रतियोगितावच्छेदकताकस्य केवला
न्वयित्वापत्तिरित्यवधारणस्य बीजम् घटत्वेन पटो नास्तीत्यादौ पटत्वधर्मावच्छिन्नप्रतियोगिताकत्वेनाभावांशे भ्रमत्वापत्ते । पस्त्वधर्मा
अभावनिरूपितप्रतियोगिनीष्टप्रकारतावच्छेदकत्वस्याभासत्वेन तदुभयपर्याप्तप्रतियोगितावच्छेदकतात्वमभावांशे प्रतियोगिनः संबंधतया भा
सतेऽप्युपपत्ते । अभावांशे धर्मान्तरावच्छिन्नप्रतियोगिनिष्ठताकत्वबोधकवृत्तीपदसमभिव्याहारस्थले च तादृशधर्मोऽन्वयितावच्छेदकत्व एम०
स्यपर्याप्तप्रतियोगितावच्छेदकतात्वमेव संबंध इति न काप्यनुपपत्तिः घटत्वेन द्रव्यं नास्तीत्यादौ द्रव्यत्वाश्रयप्रतियोगितावच्छेदकता ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भानात् घटत्वेन पटेन नास्तीत्यादिधीविषयाभावस्य प्रतियोगितायाः अव्याप्यत्वावच्छिन्नत्वात् एवं च घटत्वविशिष्टपटत्वानवच्छिन्नमिति धर्मे
च घटत्वेन पटो नास्ति घटत्ववान् पटो नास्तीति वाक्यजबुद्धावेकमेव प्रतिबंधकत्वं उभयत्र घटत्वपटत्वयोः प्रतियोगितावच्छेदकत्वपर्या
प्तेः संसर्गतया भानात् तदुभयावच्छिन्नप्रकारतायाश्च घटे तस्य तदुभयपर्याप्तप्रतियोगितावच्छेदकताकत्वसंसर्गावगाहित्वं द्वित्वरूप
प्रतिबंधकतावच्छेदकधर्मस्य उभयसाधारणत्वादित्यवधेयं। घटपटौ नास्तीति वा मात्र घटत्वादिरूपसामान्यधर्मावच्छिन्नप्रतियोगिता
कत्वभ्रमयोर्ध्वंसप्रागभावयोरन्यपितावच्छेदकावच्छिन्नप्रतियोगिताकत्वविरहेणासत्त्वात् ध्वंसप्रागभावयोर्नञ्पदस्य शक्तेरसंभव इति वा
त्वा ध्वंसप्रागभावयोरत्यंताभावविशेषत्वमते ध्वंसत्वरूपं नास्तीति व्यवहारानुरोधेन ध्वंसप्रागभावयोरपि समयविशेषावच्छेदेन
सामान्यावच्छिन्नप्रतियोगिताकत्वोपगमस्यावश्यकत्वात् तयोरपि नञ्पदप्रतिपाद्यत्वात् व्युत्पत्तिविरोधेन तयोरत्यन्ताभावीयत्वेऽपि सदात्त
नत्वघटितानंताभावत्वापेक्षया ध्वंसादिसाधारणाभावत्वस्य लाघवेन अस्य शक्ततत्वेन भावरूपाभावाभावसाधारणानुरोधेन च प्रवृत्तिनिमि
त्तनया तत्र पदवाच्यत्वानपायात् नन्वत्यंताभावत्वमखंडधर्मोऽतस्य अनुयोगिताविशेषरूपं वा न सत्त्वघटितमिति न गौरवमिति वाच्यं
तादृशधर्माणां सामान्याभावात् एकत्र व्यक्तिर्नास्तीति वाक्यात् व्यक्तित्वावच्छिन्नप्रतियोगिताकयोर्ध्वंसप्रागभावयोर्बोधनाच्च ध्वंसप्रागभावसा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

८ धारणाशक्तेरप्यप्रयोजकत्वात्। न च ध्वंसप्रागभावयोरत्यन्ताभावविरोधित्वस्य सामानाधिकरण्यात्तद्व्यक्तित्वावच्छिन्नध्वंसाधिकरणे तादृशात्यन्ता
१ भावसत्त्वात् सर्वथैवोक्तवाक्यात्प्रतीयत इति वाच्यम्। ध्वंसाधिकरणे तादृशात्यन्ताभावस्यासामानाधिकरण्यात् अन्वयितावच्छेदकावच्छिन्नत्वविशे
षितायाः प्रतियोगितायाः नञुपदार्थसंसर्गाभावे प्रतियोगिसंसर्गत्वोपगमे बाधकं दर्शयति नीलघटवतीति। न घट इत्याद्यव्यवहारादिसने
तत्संबध्यते तादृशप्रतियोगितायाः नञर्थसंसर्गत्वे प्रतियोगिसंबन्धत्वे बाधकमाह नीलघट इति। अव्यवहारादीति। व्यवहारस्य प्रमाणत्वाभावादित्य
र्थः। अखण्डप्रतियोगितायाः संबन्धत्वेऽबाधितविशेषणतराभावबोधकतया तद्वानां प्रामाण्यस्य दुर्वारतया तुल्यवैरपि तथापि प्रयुक्तेति भावः।
तद्रूपविशिष्टप्रतियोगिविशेषिते धर्मिणि शुद्धतद्रूपविशिष्टप्रतियोगिविशेषितसंसर्गाभावसत्त्वे तद्रूपविशिष्टप्रतियोगिनिष्ठ इत्यतद्रूपावच्छिन्न
प्रतियोगिविशेषितभेदस्यैव बोधनेन नञ्समभिव्याहारोपगमे न दर्शितप्रयोगवारणासंभवेऽपि वस्तुगत्या नीलघटादिमति नीलघटो नास्तीत्यत्र न घ
टः इत्यर्थत घटस्तादिप्रयोगस्य प्रामाण्यप्रसंगो दुष्परिहर इति बोध्यम्। न च वस्तुगत्या अन्वयितावच्छेदकावच्छिन्नाया प्रतियोगितायाः संबन्धता नि
यमेनाप्युक्तातिप्रसंगः शक्यवारण इति किमन्वयितावच्छेदकावच्छिन्नत्वभानोपगमेनेति वाच्यम्। लोहितवह्निमती स्तीमादौ लोहितवह्न्यादेरप्र
सिद्ध्या अन्वयितावच्छेदकावच्छिन्नत्वेन वास्तवेन प्रतियोगितायाः संबन्धत्वेनासंभवात्। अन्वयितावच्छेदकावच्छिन्नत्वाभानेन विपरीतज्ञाननिवर्तक राम०
त्वायोगस्य दर्शितत्वाच्च सामान्यतो घटमनुपादाय नीलघटत्वेन तदुपादानं च तदधिकरणे तत्र च विशेषान्तरात्यन्ताभावाभावस्याबाधितत्व ९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

प्रदर्शयन्नोक्तेविनातुत्वभावाधिकरणतायां अन्वयित्वावच्छेदकावच्छिन्नत्वभानस्युपगम्यापि घटवतिन घटघटो न घट इति प्रयोगः शक्यवारणः
पीतघटादिरूपविशेषात्संसर्गतान्योन्याभावाधिकरणतायाः प्रतियोगिसंसर्गताद्यात्म्यवत्साधारणघटत्वघटस्वत्वाभ्यां त्वनवच्छेदात् इतो नीलपदेप्रा
शनमित्याहुः। तन्न साधु। घटप्रतियोगिकस्य घटस्कांशोभयत्वावच्छिन्नासंताभावस्य घटपदोभयत्वावच्छिन्नभेदस्य च अधिकरणतायामनतिप्र
सक्तघटत्वत्वयपदस्ताभ्यामवच्छेदसंभवेन तादृशाभावमादाय पदत्यागप्रयोगस्य दुर्वारत्वात्। प्रसेक्ताभावातिरिक्तव्यासज्यवृत्तिधर्मावच्छिन्नाभावानभ्यु
पगमेपि घटप्रतियोगिकाभावत्वेनानुगताभावाधिकरणतायां घटत्वादिनावच्छेदकबाधकाभावात्। अथ यावद्घादिरूपवद्घाद्यभावाभा
वानां प्रत्येकनिरूपिताधिकरणतानां धुमत्वावच्छेदत्वासंभवेन धूमवति वह्न्यभावो नास्तीति व्यवहारानुपपत्तेः प्रतियोगिबोधकपदोपस्थाप्य
तावच्छेदकावच्छिन्नप्रतियोगिताभाननियमो बाधक माह। पीतघटवतीति॥ इति व्यवहारश्चेति। घटपदार्थतावच्छेदकमुद्दघटत्वावच्छिन्नाभावा
स्येवापि नीलपदसमभिव्याहारस्थलेऽप्यनीलघटत्वरूपान्वयितावच्छेदकावच्छिन्नाभावमादाय इदृश्य व्यवहारस्य प्रमाणत्वाच्चेत्यर्थः। नकेवलं न
ञादिपदजन्यशाब्दज्ञान एव प्रतियोगितारूपसंसर्गप्रतियोगितासंसर्गावच्छिन्नप्रकारतावच्छेदकतापर्याप्त्यधिकरणपर्याप्त्यवच्छेदकता
कत्वभाननियमः। अपितु प्रतियोगितासंबंधेन प्रतियोगिप्रकारकज्ञानमात्र एव उक्तरूपावच्छिन्नप्रतियोगितसांसर्गिकविषयतायाः प्रामा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१० 10 रिणकत्वात्तद्रूसंबंधेपनिवेवंसकत्वसाध्याभाववन्निष्ठेत्यादिलक्षणेहाध्यविशेषाभाववद्रायावाधेत्वीरणायथाकत्वसाध्यविशेषणतयावरोनवि
रोधइतिवाच्यं।तत्रसाध्यसाभावःसाध्याभावइतिषष्ठीतत्पुरुषजन्याभाववोधेषष्ठ्यर्थप्रतियोगितायाःप्रकारत्वनत्तुसंसर्गत्वाननुनञर्थाभावस्यप्रति
योगिनयधिकरणेनापिसमंसंसर्गःसंसर्गतयाभासतेनामार्थयोर्भेदान्वयवोधःसाक्षान्नभवतीतिव्युत्पत्तेनिपातातिरिक्तत्वस्यनामविशेषण
त्वात्।नञश्चनिपातत्वात्।तत्रप्रत्यासत्तियोगितावोधकपदाभावात्।घटोनास्तीत्यादौनञर्थाभावेघटादिप्रतियोगिकत्वभानानुपपत्तेः।नप
चतीत्यैत्रइत्यादौचैत्रादिप्रतियोगिवाचकपदोत्तरविभक्त्यभावेनपाकक्रियासत्ताभाववांश्चैत्रइत्यादिवोधस्यनापघटइत्यादौइत्यादौघटेनञर्थघट
भेदाद्यधिकरणतायावोधस्यचानुपपत्तेः।नचभिन्नराव नञर्थनिस्तुसंतन्मन्यभेदःतस्यचान्तयोगित्वभेदान्वयःअस्तुभेदान्वयःअन्नतरवचायम
घटोनघटइतिसमासयासपौरविल्लक्षणावोधजनकत्वानुभवोपिएवंचपर्युदासस्थलेभेदवतोगुरुतयानमुख्यनञर्थता।अपितुलक्ष्यैते
वप्रतिषेधएववचननोमुख्यार्थइतिमूलपारम्पारिमतमितिवाच्यंतत्यासत्तिसंसर्गाभावान्नसाध्याभावश्चेतिविशेषेणनञर्थत्ताकल्पनानुपप
त्तेः।एवंतावदात्मनविशिष्टवुद्धोविशेषणतावविशेषणभेदप्रकारकधीरेवविरोधिनी।नत्वभेदसंवंधेनभेदवत्त्वप्रकारकधीरपिगौरवात्।तथाच एम०
सनिष्ठपंघटइत्यादौअधिकरणेभेदस्यभेदान्वयात्तुपगमेनातादृशवाक्यजन्यबुद्धेरपंघटइत्याद्याकारजवोधंप्रत्यनुभाविकीविरोधितामङ्गीता।तथाचम १०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

तत्क्षं न घटस्य भूतलेत्वाधारतासंबंधेन घटादिसंसर्गाभाववतो धर्मभवात्तु अभावोप्यभावत्वावधतासंपर्कोवसंसर्गाभाववत्तासंबंधेनापि तत्र प्रयोगः स्यात्।
एवं भूतलेन घट इत्यादौ भूतलादौ घटसंसर्गाभावाधिकरणता तावत् घटभेदाधिकरणतानाकुत्वेन प्रतीयते इत्यत आह। प्रतियोग्यभावान्वयीति। अ
धिकरणेऽभावादिश्च भावपदं संसर्गाभावपरं॥ तत्रार्थश्चाधिकरणे यादृशपदोपस्थाप्यस्य प्रतियोगिनः प्रतियोगितावच्छेदकसंबंधसमानया
दृशाधिकरणबोधकपदस्य समभिव्याहारस्यापेक्षितत्वात् तादृशपदोपस्थाप्यप्रतियोग्यन्वितताभावस्याप्याधाराधेयभावरूपसंबंधसमानमधिकरण
बोधकतादृशपदसमभिव्याहारस्यापेक्षितत्वमित्यर्थः। अनुयोगिनीति। यादृशपदोपस्थाप्ये इत्यादिः। आधाराधेयभावसंबंधेनान्वय इति। आधाराधे
यभावनिरूपकप्रतियोगितावच्छेदकसंबंधस्य समवायादेः संसर्गमर्यादया भानमित्यर्थः। तत्संसर्गाभावस्यापि तथात्वात् तत्पदोपस्थाप्यप्रति
योगिविशेषिततत्संबंधावच्छिन्नाभावस्याधिकरणतासंबंधेनापि तादृशपदोपस्थाप्ये अनुयोगिनि संबंधमर्यादया भासत इत्यर्थः। तिप्रयर्थसे
त्ति नञोऽसत्त्व इत्यादिः। आदिपदात् सुपः परिग्रहः। क्वासादेरित्यादिना तिङर्थाश्रयत्वादि स्ववर्थसत्त्वादिपरिग्रहः। प्रथमांतपदोपस्थाप्यान्वस
विशेष्यतानियामकत्वाभिधानं तिङर्थान्वयाभिप्रायेणान्यत्र सधनं पश्यतीत्यादौ द्वितीयार्थतत्पदोपस्थाप्येनापिधानादिना यस्याप्यर्थस्यान्व
यात्। स्ववर्थविशेष्यतानियामकत्वाभिधानं तिङर्थान्वयाभिप्रायेणान्वये प्रथमांतपदोपस्थाप्यतस्याश्रनियामकत्वात्। उपस्कारकपदेतरस

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

११ योर्थस्तद्विशेष्यत्वेनात्र पदोपस्थाप्यत्वं निपातार्थकं शिष्ट षष्ठ्यर्थविशेष्यत्वे च प्रातिपदिकोपस्थाप्यत्वं प्रसत्यार्थोपस्थाप्यत्वं वा गुरु इति प्रतपस्मि
दुर्ग्रहत्वान्नाप्रतिकुर्वीति संसर्गे प्रतीकारादिक्रियायामपि तत्स्वत्वयात् । उपपदविभक्तपञ्चम्यर्थस्य स्वयोगेपाविष्ठितान् तदर्थविशेष्यत्वेन तत्र पदोपस्थाप्यत्वं
यथा चैत्रात् स्वमिलादौ मारादिपदयोगे अनुशिष्टानां पञ्चम्यादीनामर्थस्य प्रतियोगित्वादेर्विशेष्यत्वेन तत्र प्रतियोगित्वादिनिष्ठे इमादिपदोपस्थाप्यत्वात्तत्रेति
। अनुयोगिनीसमर्थः । तथा च आधाराधेयभावसंसर्गेणान्वयः स्वमर्थः । तदभावस्यापि तिङाद्यर्थकृत्या घभावस्यापि तत्त्वात् तथाप्रथमान्तपदोपस्थाप्ये
आधाराधेयभावसंबंधेनान्वयः स्वमर्थः । न पचति चैत्रः स्वपादित्वात् चैत्रोदनस्य अर्थस्य आधारस्य विशेषणतेनान्वयानुभवात् एवं चैत्रेन पाकः कृतिरिति
चैत्रेणपचतीत्यादि चैत्रनाद्विशेषत्वप्रकारेण पाककृत्याघभावाबोधाचेति भावः । चैत्रस्य धनमित्यादौ षष्ठ्याद्यर्थस्वामित्वादिकं तत्प्रकृत्य
र्थ चैत्रादिविशेषणतया भासते । स्वामित्वप्रकारेण चैत्रादेर्धनादौ सत्तादिसंबंधेनान्वयः । विभक्त्यर्थविशेष्यतायत्रप्रातिपदिकार्थस्य प्रा
तिपदिकार्थं साक्षात् अपि भेदान्वयबोधापगमात् । नामार्थयोर्भेदान्वये प्रकारीभूतविभक्त्यर्थोपस्थितेस्तत्त्वात् । अथ वा षष्ठ्यर्थः स्वामित्वादि
कं प्रकृत्यर्थविशेषणतापन्नं तेनैव भासते धनादेस्तद्वत्ता अपत्यमित्यत्र निरूपकता संबंधेनान्वत इत्यन्वय इति प्राचां मतं दुषयिष्यन् स्वमतमाह । षष्ठ्या ए॰प॰
देर्स्वेति । आदिपदाद्धितीयान्तत्तोपपरिग्रहः । चैत्रादिति रूपित्तत्वमिति । स्वत्वादिकमित्यादिना कर्मत्वजन्यत्वपरिग्रहः । निरूपितत्वसंबंधेन चैत्रा ११

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

निरूपप्रकृतसर्थान्तयोः सम्बन्धः तन्निष्ठमित्याद्याश्रयतासंबन्धेन विशेषणात् तथा चैत्रान्यपि आश्रयतासंबन्धेनैव चैत्रादिनिरूपविशेषणेनान्वयिताद्
स्वर्थः। स्वामित्वादौ स्वादिताकर्मत्वकर्तृत्वपरिग्रहः। तत्स्वामित्वे चैत्रस्य चैत्रनिष्ठस्वामित्वादेश्चेत्सर्थः। धनादावृत्तित्वेनेति। स्वपनिपामकत्वत्वनिरूप
कत्वादिसंबन्धेन धनादिसंबन्धित्वेपि धनादावृत्तित्वेत्यर्थः। धनादेश्चाश्रयतासंबन्धेनैव चैत्रादेः स्वनिष्ठस्वामित्वादेश्चाभावमत्त्वेनेति शेषः। अति
प्रसंगात् अभवन्मतेचाश्चधितत्वात् आदृशैव चैत्रायमावर्त्तधकसस्वस्वादिप्रयोगस्य भामारापप्रसंगात् तत्स्वामित्वादेः प्रकृतसर्थविशेषणतापक्षे स्वामि
त्वादेर्निरूपकतासंबन्धावच्छिन्नाभावस्य प्रकृतसर्थविशेषणतापक्षेत्तद्विशिष्टप्रकृतसर्थचैत्रादेः स्वत्वादिसंबन्धावच्छिन्नाभावस्य नञा प्रत्यायनो
पगमात् नोक्तातिप्रसंगावकाशः। तादृशाभावस्य धनादेश्चाधादिस्वत्वस्याह। निरूपकत्वादेरिति। आदिपदात् स्वत्वादिपरिग्रहः। प्रतियोगितावच्
छेदकत्वादेरिति। स्वनियामकत्वपेस्यादिः। स्वत्वनियामकसंबन्धावच्छिन्नसंसर्गाभावस्य भामाशिकत्वात् यन हि संबन्धेनायम्मिहेतिप्रत्ययस्तत्
संबन्धमादायैव नायम्मिहेति प्रत्ययश्च निरूपकतासंबन्धेन धनेस्वामित्वमितिप्रत्ययाभावात्तेन संबन्धेन नात्र स्वामित्वमिति प्रतीतेरप्यभावः। अ
तरावधनमात्रे स्वामित्वमात्रस्याश्रयतासंबन्धावच्छिन्नाभावसत्त्वेन तदृशहत्तिवाचीनीलरूपाभावइतिवद्धेचैत्रीयेपि धनेन चैत्रनिष्ठं स्वामित्वमि
ति धनेऽचैत्रीयत्वस्य स्वामित्वेवचैत्रनिष्ठत्वस्याधाकृतपानमवद्धिपत्तौ अपि तद्धनेन स्वामित्वमित्येचाश्रयतानिरूपकतासंबन्धावच्छिन्नस्वा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१२ मित्वाभाववत्तात्पर्येषणत्तथाप्यवहारस्य दुर्वारत्वापत्तेः अत्र तत्र एव कृतिमत्त्वरूपकर्तृत्वसंबंधस्य भ्रमनियामकतया न पचतीत्यत्र तत्संबंधावच्छिन्नप्रति
योगिताभावस्य बाधासंभवेन पचतीत्यसाधौ कृतिमत्त्वसंबंधेन याकादेः कर्तृत्वेन यद्बोधं मणिकारोक्ता पजगामा उपजग्मा मनुजानातीत्यादावपि तत्संबंधेन ज्ञा
नादेरिति भावः इत्थं च नियामकसंबंधावच्छिन्नप्रतियोगिताकाभावस्यैव स्वीकारस्यात्तसंबंधावच्छिन्नत्वे चत्वाभावे चत्रैपस्थताभावयोः समनियतत्वापत्त्या भि
न्नत्वेनाभावकल्पनाधिक्ये विरहेऽपि व्यतिरिक्तप्रतियोगिताकल्पनाक्लिष्टात गौरवमिति पि बोध्यं। पचन्चैतीति प्रयोगे इमर्थः। न संसर्गमर्यादया लभ्य इति भेदा
न्वये निराकांक्षत्वेऽपि स्यादिः ज्ञात्वे शोच्यप्रातिपदिकार्थात् तेनेति। तत्संसर्गार्थे तत्त्वसार्थस्य संसर्गाभावबोधे अत्र पागिनि अत्र तु योगिवाच्यक्लृप्तेऽत्राष्टसमभ्यपेक्षितात्तना
भावसंबंधस्य आधारतारूपसंसर्गत्वासंभवेन तदर्थकविभक्तिं विना तत्प्रकारतासंभवादिति भावः। अत्र च भूतलघटाभावयोः साक्षात्प्रभेदान्वयबोधस्य च
प्रसिद्धात्तत्त्वासमवायाश्च कल्पनात्। भूतलं न घट इत्यादिवाक्याज्ज्ञातादृशशाब्दबोधापत्तिः। घटवद्घटाभावविशिष्टभूतलादिवाचकपदाघटितात्तादृशी
तिवाक्यात् भूतलाद्यंशे घटाद्यभावप्रकारकबोधः प्रसिद्ध इत्युक्तं तत्त्वदादातादृशबोधोत्पत्तौ तादृशवाक्यज्ञानं न तु घटकत्वादिपदजन्यतादृशविशिष्टबोधोप
स्थित्यादिघटितसामग्र्याश्च प्रयोजकत्वात् तदभावादेव नोक्तस्थले तत्सादृशसंगः। भूतले न घट इत्यादौ प्रसिद्ध्यैव बोधश्च घटाद्यभाववद्भूतलादिरिति तत्प्रकार राम०
कः तदनुसारप्रयोजिका च सामग्री पदार्थस्य समभिव्याहृत्य प्रथमांतघटादिपदतज्जपदजन्यघटादितदभावोपस्थिति भामिवतत्पदसमभिव्याहृतत्वमसमीजन्या १२

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

अथ यत्रोपस्थित्यादिनापि घटिताभूतलं न घट इत्यादौ तदभावो ह्यनन्तत्वादप्रसंगः एवं न पचति चैत्र इत्यादौ प्रसिद्धस्य चैत्रादिविशेष्यकपाक
कृत्याद्यभावप्रकारकबोधस्य सामग्री प्रथमान्तपदजन्यतयोपस्थितिविभक्तिजन्यकृत्यादिरूपप्रतियोग्युपस्थितिघटिता तदभावासम्प्र
कत्तिर्न चैत्र इत्यादौ न तत्प्रसंगः एवं याकत्तिर्न चैत्र इत्यादिस्थले प्रसिद्धस्याभावांशे चैत्रादिवृत्तित्वप्रकारकबोधस्यापत्तिः स्यादतस्तां इति
बोध्यमानत्वसम्बन्धेन भूतलादिपदेन नञर्थाभावस्याप्रतियोगितासम्बन्धेन भूतलादिवृत्तित्वबोधने तादृशपदेनेवैत्र स इत्यादौ षष्ठ्यन्तपदेनैव
प्रथमान्तार्थविशेषणतानञर्थाभावेपि कदाचित्प्रतियोगितया स्वार्थान्वयबोधजननात् घटाभावो भूतले भूतलवृत्तिरभाववान् घट इति
द्विविधशाब्दबोधः भूतले न घट इत्याद्याकारकशाब्दत्वबोधः एवं च तादृशवाक्यात्कदाचित्प्रथमो बोधः कदाचिच्च द्वितीय इत्यत्र किं नियामकं इत्याका
ङ्क्षायां तात्पर्यभेद इत्यत्र नियामकत्वमाहात्म्ये चेति अत्र भूतले न घट इत्यादिवाक्यस्थले नञ समभिव्याहृतसम्बन्धार्थस्य भावनिष्ठत्वेपि वान्वयो नतु क
दाचित्प्रतियोगितया विनिगमकं चाग्रे व्यक्तीभविष्यतीमतत्र ह्यज्ञतरं वेति कदाचित्समभिव्याहृतार्थप्रतियोगिकाभावस्यापि न ज्ञाबोधना इ
त्यसर्थः ॥ द्रव्यत्वेनेत्यादि द्विविधवाक्यप्रतीतिरेकविशेष्यकत्वानुभवः एवं धर्मिकविशेष्यकप्रतीतिजनकत्वानुभवः नञ्जलं द्रव्यत्वाभावस्य
वज्जलवृत्तित्वबोधोपगमेन तत्प्रतीतावभावस्यैव विशेष्यत्वात् तथाप्यायोगं ध्वस्तं तत्र द्विशेष्यकवाधानुभवसान्तयोरेकविशेष्यकबोधजनकत्वानु

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१३ मत्वेविशिष्यतइतिभावः॥नञर्थाभावनिष्ठावेयत्तावोधकत्वंसप्तम्याः स्वंइपर्ताम्मत्तमुपन्यस्यतिकेचित्तिति।विशेष्यविशेषणस्याभावइतिनञोत्र
13 सत्वेयत्तदर्थयसदर्थीविशेषणतयाभासतेतत्रनञाजत्सदर्थत्तसदर्थाभावो।विशेषणतयाप्रसाधत्तइत्सुर्थः॥तथाचभूतलेघटइत्यतोघटे
भूतलवृत्तित्वस्यविशेषणतयावोधात्भूतलेनघटइत्यतोपिघटेभूतलवृत्तिताभावएवविशेषणतयाप्रतीयते।नतुघटाभावोभूतलवृत्ति
रितिएकाकारवाक्यद्वितिविधवोधजनकत्वोपगमेनञ्यदेसमभ्यंतभूतलादिपदसमभिव्याहारज्ञानसद्धितिविधकारणत्वकल्पनापत्तेः।उभय
साधारणत्वकार्यतावच्छेदकैकसम्यकंयचिन्नंमवेपिताहृशवाक्यधर्मिकद्वितिविधवाकार्यतासमर्जज्ञानस्यपृथककारणतयातत्कारणताधि
कसद्वर्वारत्वादितिभावः॥स्त्रतमतेपुत्तांतरमाहस्वतत्रएवेति।घटौस्तौत्यादाविवेसासिनाघटौन्तः॥घटाःसंतिइत्यादिपरिग्रहः।वचनेनेतिनियमः
ति।विशेष्यविशेषणपदयोःसमानवचनत्वनियमेनहञित्यादौवचनसाम्यंतियमइतिभावः॥भूतलेघटौनास्तोत्यादौअभावस्यभूतलावृत्ति
विशेष्यतेतदैकेनघटेनसत्त्वादौद्विवचनानुपपत्तिरितिभावः॥नचेतन्मतेपिघटेनासीत्यादावप्यानंताप्रसमतियोगितयाभावविशेषणं
त्वमेवनघटविशेषणत्वमितिमत्वेवंमतघटत्वआदिपदसमानवचनत्वेपिघटेनसइत्यादावास्यातस्यविशेष्यवाचकपदसमानवचनत्वानुपप राम०
त्तिरितिवाच्यम्।विशेषणस्यसाक्षात्स्वार्थविशेष्यवाचकपदेनवसाक्षीविशेष्यनिपातार्थविशेष्यवाचकपदेनापिसमानवचनत्वनियमइत्याश १३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

यात्। न च घटे घटो नास्तीत्यादाववच्छिन्नाभावस्य घटे घटो बाधप्रसङ्गः एकघटवति घटे घटो नास्तीति व्यवहारेण स्यात् तत्र घटे तादृशाभावत्वावच्छिन्नाद्यवच्छे-
दकत्वस्य भावात्मकत्वादिति वाच्यं। अवच्छिन्नावच्छेदेन प्रतियोग्यसत्त्वेन प्रतियोगिमत्त्वेपि तदवच्छिन्नेतरभावस्य तत्रैव दृष्टिनोपगमात्। किं चित्तु त्र-
त्र घटे घटो नास्तीत्यादौ घटद्वयत्वादिसमानाधिकरणैव तादृशाभावत्वावच्छिन्नाभावः प्रतिपत्तेः। यत्र च एक एव घटस्तत्र तादृशद्वित्वसामानाधिकरण्येन घटा-
न्तरे तादृशद्वित्वाभावस्य बाधात् तत्र घटो नास्तीति वाक्यस्य योग्यता। न चैवं यत्राधिकरणे किं चित् घटद्वयं वर्तते तदधिकरणावच्छिन्ना-
भावस्यापि घटपर्याप्तद्वित्वाश्रयतादृशवृत्तिघटान्तरसत्त्वादधिकरणापरमत्र घटो नास्तीति वाक्यस्य प्रामाण्यं स्यादिति वाच्यं। घटद्वयपर्या-
प्तद्वित्वावच्छेदेन तन्निष्ठाभावसामानाधिकरण्यप्रत्योपगमात्। यत्र देशे किं चित् घटद्वयसत्त्वं तत्र घटद्वयपर्याप्तद्वित्वे तादृशवृत्तित्वाभावसामाना-
धिकरण्यासत्त्वेन न घटपर्याप्तद्वित्वावच्छेदेन तादृशवृत्तित्वाभाव इति तद्बोधकतादृशवाक्यस्याप्रामाण्यमस्त्वेवेत्याहुः। तत्र द्वित्वसामान्यतादृशद्वि-
त्वे तादृशवृत्तित्वाभावस्य सामानाधिकरण्यभाने हि धर्मितावच्छेदकतादृशद्वित्वप्रकारेण भासमानधर्मिणि तादृशाभावरूपविशेषणसंब-
न्धभानं न तु तादृशद्वित्वे तादृशाभावाधिकरणवृत्तित्वस्य प्रकारतया संसर्गतया वा भानं तत्र तथाभासकाभावात्। तथा च तादृशद्वित्वे तादृ-
शद्वित्वे तादृशाभावसामानाधिकरण्यावच्छेदकत्वस्य तत्सामानाधिकरण्ये वा तादृशद्वित्वावच्छिन्नत्वस्य भानमप्रसक्तमेव एकदेशवृत्तिधर्म

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१४ स्यादित्वाद्यवच्छेदेन भानोपगमे तु अत्र घटो नास्ति इति वाक्याद् उक्तोदितत्वावच्छेदेन तत्तद्देशावृत्तिसत्ताभावावच्छेदकत्व भानोपगमात् । घटस्याधिकर
णदेशासित्वाभावस्य तदधिकरणवृत्ति घटस्य साधारणादित्वावच्छेदेन सर्वेष्वपि भातिप्रसंगः । तादृशादित्वावच्छेदेन अभावावच्छेदकत्वभा
नं च अभावरूपविशेषणीभूतधर्मितावच्छेदकतावच्छेदकतादृशादित्वावच्छिन्नावच्छेदकताकत्वरूपधर्मितावच्छेदकावच्छिन्नत्वभानं न तत्र संभवेम
वा अवच्छेदकावच्छेदेन विशिष्टबुद्धौ धर्मितावच्छेदकावच्छेदे घटत्वपाविशेषणाभानस्य सर्वसंमतत्वात् । एवं च युक्तं यत्र घटो नास्ति घटो नास्त
इत्यादौ अभावस्य आश्रितत्वादिक्रियान्वय एवं सदपि तु शक्तेति तु आश्रयघटस्याभावे सत्त्वसंतार्थान्वयः । तथापि क्रियां विना न वाक्यसमाप्ति
रिति अत्र न घट इत्यादावपि अस्तीत्यध्याहरणं तिङन्तार्थसाभाववेश्यत्वयदत्वसभिमेतं तदभिहितम् । अस्तिइत्यस्य समभिव्याहारे चाधार
स्यानिरूपितत्वमर्थः । इत्यस्यैकधातूपयोगे निरूपकस्याधारत्वात् । भूतले घटत्वं भूतले नास्तीत्यादिरूपसमानार्थतयोवृत्तिरस्यार्थः । गतिस्थितौ
यासत्ता शब्दस्य समवायेन सत्ताप्रतियोगिकत्वविशिष्टसमवायात्तु योगिकत्व वा लक्षणया वा उपपत्तिप्रकारः विज्ञनीयः । यथा अस्तु तोर्थ अत्र
पपत्तिं दर्शयति जातीति । अप्रसिद्धेरिति तादृशाभावस्य नञा बोधयितुमशक्यतादिति शेषः । इदं च नञ्समवायेन वृत्तेः सत्वमर्थ इत्येवं वा संवृत्तिसा रा०मु०
मान्यस्य सत्समर्थत्वोपगमे अप्रसिद्धिपरिहारेणानुसरेव बाधकमाह । संबंधात्तरेणेति । एकार्थसमवायेनेत्यर्थः । गुणकर्मान्यत्वविशिष्टसत्तात्वा १४

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

द्विनासत्तारूपगुणादिघटितत्वादुपगमे गुणेन विशिष्टसत्ताऽत्यादावप्यविशिष्टनिरूपिताधिकरणत्वेलक्षणापायोऽपत्तमुपपादनीयमत्र यथावि
शिष्टसत्तेतिवाक्यमेव ननु घटादिमत्तित्वघटकाभावस्यालक्षणापात्रसंभवइतिचेन्न । भावप्रसत्तपांतस्तजाशङ्कयापि वा कत्वयाजातो नसत्तेत्यत्रापिस
मवायत्वाभानुपपत्तिः परिद्विभावप्रसप्रस्यासाधारणधर्मवान्कस्समवायेलक्षणेतिमन्तेतत्रापक्तोत्तेपिविशिष्टनिरूपिताधिकरणत्वल
क्षणाचभावप्रसत्तैवमनुदायस्पृश सामिध्यालक्षणायाघ्यसंभवान्नामतांतरमाहोमत्तमर्थेत्ति । भूतलेयद्येनास्तितानो सत्तानस्तीत्यादौ भू
तलजात्याद्यस्तित्वरूपसत्तमीसमभिव्याहृतनञ्किपापदस्यपितार्थस्याघ्रपत्तपान्नन्वयी यः अभावः प्रतियोगितासंबंधेन प्रकारीभवत तत्तत्स्वविशे
ष्यतयाप्रतियोगिभासत इत्यर्थः एवं च परम्परयाक्रियाविशेष्यप्रतियोगिकत्वकघटादिपद समभिव्याहृतनञ्क्रियापद सनिवेशतीति द्रष्टव्यं ये
नरूपेण प्रतियोगितावि शेषणांत्तत्तद्रूपावच्छिन्नत्वविशेषितैवप्रतियोगितासंबंधतयाभासते अतोयदादिप्रतियोगिविशेषाभावमादायाव्ययेना
स्तीत्याद्ययेनसंवहारः । अवच्छिन्नत्वं चनान्यूनवृत्तित्वं । अपितु स्वरूपसंबंधविशेषः तेनचनाद्यादिमत्तितारणीतारणिवन्हीजस्वइतिवत् तादृश
भावमादायात्रवह्निर्नास्तीत्यादयोनप्रयोगाः नवागुणान्यत्व विशिष्टसत्तात्वावच्छिन्नाभावमादायगुणादौसत्तानास्तीत्यादयः अभावे प्रतियो
गिनो अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य समस्तसमर्गतायक्षेपादृशान्तिप्रसंगस्यतथैववारणोपपत्तेत् । अत्रचाभावेअन्वयोगितासंब

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१५ धेन प्रतियोगिप्रकारको घटो नास्तीत्यादिरिव प्रत्यय आनुभविकः । ननु प्रतियोगिनि प्रतियोगितासंबंधेनाभावप्रकारकोऽत्राभावो घट इत्या
15 दिः प्रत्ययस्तथैवं प्रतियोगिन्यभावस्य प्रतियोगितासंबंधावगाहनमस्त्विति चेन्न क्वास्ति नञ्पदस्य प्रतियोगिन्यभावप्रतियोगिताप्रकारक
बोधस्य न संभवति प्रयोगितायाश्च पदार्थत्वात् । न च नञ्पदोत्तरविभक्तिरेव प्रतियोगितार्थिका तत्कल्पने गौरवात् । प्रथमा विभक्तेः संख्यातिरि
क्तार्थत्वे साधुत्वात् । निपातोत्तरं विभक्तेरनुत्पत्तेर्वा । तदनिष्टेऽपि पिशाचो ध्वंसानुभवात् । प्रतियोग्यभावयोः संबंधं संबंधितयावगाह
मानस्य च ज्ञानस्य लाघवेन प्रतियोगिविशिष्टधीविरोधित्वपाजातेन सत्ता इत्यादिवाक्यजन्यातिधर्मिकसत्तादिसंशयादिनिवर्तकज्ञानानिर्वा
हकत्वापत्तेश्च । यत्र नञोऽत्र सत्वप्रतियोग्यनुयोगिनोः संबंधो भासते तत्रैव नञ्जन्यत्तत्संबंधावच्छिन्नप्रतियोगिताकत्वरभावः प्रत्याय्यते इति मु
ख्यत्वनुसारेण भूतले न घट इत्यादितो भूतलादौ घटाद्यभावाभानं क्षोकारपतिः । पारस्परप्रतियोग्यनुयोगिवाचकपदसमभिव्याहारस्थले चै
तदर्थः । विशेष्यविशेषणभावयोः प्रतियोग्यनुयोगिनोः रूभेदरूपतादात्म्यसंबंधेनान्वयः । विशेष्यविशेषणभावः तत्र तत्र वस्तुन्यो नाभावो नञा बो
ध्यत इति तस्य तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वादिति भावः । एवं च भूतले घट इत्यादौ भूतलघटयोर्धर्माद्यात्म्याप्रतीतेः भूतले न घट इ गम०
त्यादौ नभेदो घट इति सवित्तीत्वं घटो नील इत्यादिप्रतियोग्यनुयोगिनोरभेदान्वयादाहार्यारोपान्नायं घटो नील इत्यादिर्यो माभावबोधी त्याहार्यग्रामो १५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भूतले घट इत्यादाविव कथं न भूतलघटयोरभेदान्वयबोध इत्यत आह। तत्रेति। नामार्थयोरभेदान्वयबोधे सर्वत्र समानविभक्तिकता
विरहेऽपि स्तोकं पचतीत्यादौ स्तोकपाकयोरभेदबोधात् स्तोकं पचतीत्यादेः पाकादिक्रियायां स्तोकाभेदबोधान्नामार्थयोरित्युक्तं। समान
विभक्तिकत्वाऽऽएकजातीयविभक्तिमत्त्वं एकजातीयत्वं च प्रथमात्वद्वितीयात्वाद्यन्यतमरूपेण तत्तदानुपूर्व्यात्मकेति चेदतः प्रमाणमित्याह। अप्यभे
दान्वयबोधः नीलघटस्स्यादिसमासमभिव्याहारेणापाह। विरुद्धेति। विशेष्यपदे एकजातीयविभक्तिराहित्यं विशेषणपदे एतज्जातीयविभक्ति
राहित्यमनन्तु विशेष्यपदस्थैकत्वेकविभक्तिविजातीयविभक्तिराहित्यं विशेषणपदे नीलघटरूपमित्यादिनीलघटयोरभेदबोधानुपपत्तेः
घटादिपदोत्तरविभक्तेरप्रसिद्धेः विशेष्यपदानन्तरकालीनाद्वितीयत्वाद्यन्यतमरूपवद्विभक्तिराहित्यं वा विवक्षितं। इदन्तु चिन्त्यते। विरुद्धवि
भक्तिराहित्यं न स्वरूपसत्प्रयोजकं तात्। विरुद्धविभक्तिकयोरपि समानविभक्तिकत्वभ्रमेऽप्यभेदबोधात्। नापि ज्ञातं विरुद्धविभक्त्यनुपस्थितिदशा
यां विरुद्धविभक्तिराहित्यज्ञानापेक्षानीलो घट इत्यादौ स्वाकांक्षात्रयप्रत्यये विशेषप्रकारेणाभासमानयोः स्वादिविभक्तिमत्त्वविशेष्यविशेषणपद्योः सत्त्वं तत्त
द्रूपानुपूर्वीज्ञानान्नीलघटस्सोऽहेत्वनीलपदाद्यव्यवहितघटपदत्वादिरूपानुपूर्वीज्ञानान्नीलघटयोरभेदान्वयबोधात्। तस्मान्नाद्दशतादृशानु
पूर्वीज्ञानानामननुगतानामपि तत्तदानन्तर्येऽयदितधर्मावच्छिन्नमभेदान्वयबोधं प्रतिहेतुतारीत्येति वाकारेणास्यास्वरसः सूचितः इत्युक्तमुपसंहरामः॥

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

९६
16
ननुप्रतियोग्यनुयोगिपदयोः प्रथमान्तत्वमेव नामार्थयोरभेदबोधे तंत्रं किं नोच्यते तावतैव भूतले न घटः नीलो न घट इत्यादौ भेदबोधारण
संभवादित्यत आह तत्त्वेति प्रतियोग्यनुयोगिपदयोः प्रथमान्तत्वस्य भेदान्वयबोधप्रयोजकसमानविभक्तिकसमभिव्याहारस्या
न्यामाभाववाधे तंत्रतोपगमादित्यर्थः नानुयाजेष्वित्यादौ विभक्तिप्रतियोग्यनुयोगिवाचकयोः प्रथमान्तत्वाभावेपि भेदान्वयबोधप्रयो
जकसमानविभक्तिकत्वमात्रं तन्त्रमिति शेषः। यजतिष्वनुयाजभेदबोधार्थमिदमनेनाभिमतं वधः क्रियन्तेपि यजतिशब्दो यागरूपधात्व
र्थवाचकः दृष्टान्तेन गोशब्दमित्यादौ हेतावनुशेषमसादिपदमिव कथानादिबोधकं रनुयेयजामहमित्यादेरनुषंगेणानानुयाजेष्विन्येनेनानुयाजे
षु येयजामहं न करोतीति वप्रत्याय्येनेत्यर्थः वराञ्चो ध्यांद्वनकर्वीते तत्र एथ्यारात्विध्याद्दुकरणोन्वानान्वेष्टसाधनताद्यभावेन जाप्र
तिपाद्यत्तथा प्रकृतेपि विध्यर्थकतिङर्थस्येष्टसाधनत्वस्याभावरात्वे पयजामहार्हस्मिन्नपाठकरणे नञ् प्रतिपाद्यः न तु यजतिष्व
नुयाजभेद इत्याशंकां निराकरोति एकत्वाभतानुरोधादिति अमथा बामभेदेन गोरवादिति भावः गोत्सात रमाह येयजामहं इति न नु
भेदे प्रतियोगितया नुयाजान्वये च अनुयाजपदोत्तरसप्तम्या वैयर्थ्यप्रसंगः तया आधारत्वरूपस्वार्थबोधनादित्यत आह विशेषणेति प राम०
था अनुयाजेषु यजतिष्विति सप्तम्या अर्थसंबधे नमास्याध्यजमादि विशेषणानुयाजपदोत्तरविभक्तेनाधारत्वाद्यर्थपरत्वं अपि तु निर्वि ९६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

भक्तिकत्वात्तिपदिकस्यासाधुत्वापत्तेः साधुतार्थकस्यैव तथात्वात्तादृपाजेषु पङ्क्तिचित्रा इत्यत्र एतत्समानाधिकरणत्वं नञर्थ इत्याराजपङ्क्ति विशेष
णार्थकानुपाजपदोत्तरविभक्तिः साधुत्वार्था इत्यर्थः । नैवं पदसाधुत्वापत्तेः घटो नील इत्यादौ नीलादिपदोत्तरमपि वक्ष्यते अर्थमेवस्यात्तत्र
सप्तमीति वाच्यम् अभेदेन साक्षाद्विशेष्यविशेषणभावापन्नार्थकयोरिव नञर्थभेदद्वारा विशेष्यविशेषणभावापन्नार्थकयोरपि प्रातिप
दिकयोः समानविभक्तिकता नियमेन प्रवृत्तेः प्रथमापत्त्यप्रसक्तेः । ननु घटः कर्मत्वमित्यादौ घटकर्मतादौ नाम्नार्थाधाराधेयभावादिसंब
न्धेनानन्वयात् नामार्थेन नामार्थस्य विभक्त्यर्थप्रकारेणैव तत्संबन्धेन साक्षात्स्वपदविभक्त्यर्थमतत्त्वस्यैव वाच्यत्वपदइतिस्तुमतिरूपं तथा
तथा च घटो नीलः अनुपाजेषु पङ्क्तिश्चित्रा इत्यत्र प्रतियोगपत्युयोगिनोरभेदान्वयासंभवात् घटो न नीलः नानुपाजेषु पङ्क्तिश्चित्रा इ
घटपागौरेणी लानुपाजादिभेदेन ञाकर्थबोधनीपदस्य तत्राह नामार्थयोरिति भेदान्वयबोध इति । आधाराधेयभावसंबन्धेनान्वय
बोध इत्यर्थः । प्रकारीभूतविभक्त्यर्थीपस्थितेरिति । विशेषणीभूतनामार्थप्रकारकतया तादृशसंबन्धभानप्रयोजकविभक्तिजन्यतदुपस्थि
तेरित्यर्थः । एतच्च घटकर्मत्वमित्यादौ विभक्त्यर्थाधेयत्वादिविशेषितस्य घटादेराधाराधेयभावादिसंबन्धेन कर्मतादावन्वय इति प्रा
चीनमतानुसारेणोक्तम् अन्यथा तादृशबोधाप्रसिद्धेरेवासंगत्यापत्तेः । नामार्थयोः साक्षात् भेदान्वयानभ्युपगमे वा भवतीत्तविभक्त्यर्थम

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१७ तरगच्छतीतिप्रसक्तिः। घटैकमत्वमित्याशेषत्यादिविशेषितताधेयत्वादिरूपविभक्त्यर्थस्यैव कर्मत्वादेः प्रकारतया भानादितिगुरुमतं। अन्यथा सम
म्यर्थाधारत्वादिविशेषितप्रकृत्यर्थस्याधेयत्वाधारत्वादिसंबंधेनापरनामार्थेऽन्वयेनञ् समभिव्याहारस्थले स्वाधेयत्वादिसंबंधावच्छिन्नना
मार्थाभावस्यैव बाधरनामानार्थभानसंभवे मनपाद्यत्वनियामकसंबंधस्यासत्ताभावप्रतियोगिताकच्छेदकत्वस्य क्वाविरहे राजन्दस्य भवादसा मं
ञ्जस्य मापाद्येत वस्तुतो नामानार्थयोरन्वयबोधस्य तत्र साक्षाद्न्वयबोधेन विवक्षितः। अपितु नामार्थप्रकारतानिरूपितनामार्थविशेष्य
ताकस्य धराबानिरूपितत्वं च साक्षात्संबंधे साधारणं प्रकारीभूतविभक्त्यर्थोपस्थितेस्तत्र त्वादिम्यस्य च विशेष्याभाववन्नामार्थप्रकारतया
प्रकारीभवन्नामार्थविशेष्यत्तया अन्यथात्तरभासकविभक्तिजन्यतदुपस्थितत्वादेस्तत्र त्वादिसमर्थः। नामार्थविशेष्यकाभेदान्यसंसर्गकत्वत्प्रकार
कान्वयबोधे धराबविभक्तिजन्यतदुपस्थितेर्हेतुत्वादिति पर्यवसितोऽर्थः। ईदृशकारणाबाधान्नामार्थनामार्थयोः साक्षाद्भेदातिरिक्तसंबंधेन
प्रकारत्वाद्यं वचनभेदान्वयराबुक्तसुत्तते। युज्यते चैतत् यन्निषिसाद्यवभेदसंसंबंधेनानुपाजादेर्योग्यविशेषणत्वाबाधकाभावानानुपाजेषुयज्ञत्वेषि
त्यादौ यायाद्यवतुयाजादिभेदस्य बोधो निरयवाद एवति भावः। येषां मते नीलं घटमानयेत्यादौ विशेषणविभक्तेः सार्थकत्वाय तत्साम्ये भेदा रा॰म॰
र्थकत्वमावश्यकं। ननु नीलघटाबोधस्ताद्यत्वं संसर्गत्वन्मते नञ्जनामार्थनामार्थरूपप्रतियोगिविशिष्टभेदबोधपि तु न शक्यत इति तन्मते नम १७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वसेवतद्बोधः। अपितु नामार्थविशेषितविभक्त्यर्थाभेदाभावरावनेदेवेऽस्मेसादौ चैत्रस्वत्वाभाववत्त्वज्ञानेनाप्पतो। एवं च नञो भेदेन णत्वं तं रथ्य
पित्वनालोघटइसादावनीलादिपदेन विभक्त्यर्थाभेदविशेषणतापानीलादिभिन्नस्यबोधात् तदेरोधेन भेदवानएवलक्षणयानञर्थः। अस्मंता
भावायेस्वपा अभेमामाभावविशिष्टस्य धर्मिणोगुरुत्वयाविनिगमकसत्वेननत्रशङ्का मिथोरिसाहाला घवेनेति। उक्तकार्यकारणभावे अभे
दातिरिक्तसंसर्गकत्वानिवेशादित्यादिः। तयोः नामार्थयोः अन्वयबोधमात्रे भेदाभेदस्था श्रग्णान्वयबोधसामाग्यो। तथा ते। अंतराभासमान
विभक्त्यर्थेपि स्थितेः तन्नत्वे तथाच नामार्थयोरभेदेनापि न साक्षादन्वयबोध इति भावः। नन्वेवं नीलोघटइसादौ नीलघटयोरभेदान्वयबो
धानुपपत्तिः। अभेदेऽपसांपकविभक्त्यसत्वादित्याशंकांनिरस्यतीति विशेषणा विभक्तिरितिविशेषणपदोत्तरविभक्तिरित्यर्थः। अभेदान्वयिके
ति अभेदेप्रथमाविभक्तेरनुशासनविरहान्नतदर्थकत्वसंभव इति न शंक्यं। विशेषणपदे विशेष्यपरसमानविभक्तिकत्वानुशासनसत्वात्।
अन्यथा अभेदसंसर्गतामतेपि विशेषणपदोत्तरद्वितीयादेः कर्मत्वाद्यर्थबोधकतयास्वातुशासनविकत्वादुपपत्तेः। तदनुशासनसेवाभेदार्थकता
ग्राहकतोपगमात्। नन्वेवं नीलोत्पलमित्यादौ समासस्थले नीलोत्पलयोरभेदबोधो न स्यात्। तदर्थकविभक्तिविरहादित्यतआह लुप्तविभ
क्त्यनुसंधानमनर्थकं। तथापि विरुद्धत्वात्तस्माद्धनीलविति। विजयरिति। यद्यपि विजयगुरित्यादिवदुर्नीहिसमासेगवादिपदसंभवचित्रगवादिसंभव

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१८ ष्टिनिलाक्षणिकं चित्तपुरुषं तत्साक्षेपं ग्राह्यमिति चिन्नास्विद्वान्तरलक्षणविभक्तानुसंधानमनर्थकं तस्यापि पूर्वपदस्य निरर्थकत्वेन समस्यमानपदयोःसा
र्थकत्वघटितसामर्थ्यात्तुपपसासमाधानानुपपत्तेः। उत्तरपदं पूर्वपदार्थविशेषितत्वार्थमुक्तं चिन्निवलाक्षणिकं पूर्वपदस्य समभिव्याहारसे स्वतत्त्वार्थो
भेदेऽलक्ष्योऽर्थकं दर्शाभूते उत्तरपदस्मुख्यार्थेऽभ्युपगति चेत्किन्नाम सत्त्वइसा श्रयेन चित्तगौरिसोरिविन्नास्विपदान्तरं विभक्त्यनुसंधानाभिधानं न चारू
ढत्वात्तेषां चतुष्टयं मादिवद् द्वीहो समस्यमानपदयोर्थयोरभेदाभावेन वानरकर्तृकाणहणकमेतादितारस्यादिप्रानवानरादिपदस्येनैन रूपेण लक्ष
णाविना न निर्वह इतीति स्वाग्रहणात् स्वरूपपूर्वपदार्थघटितोक्तरूपेण उत्तरपदलक्षणायामावश्यकत्वात् समस्यमानपदद्वयार्थान्वयस्य
मासनिपामकत्वात्तुपपत्तिरिति वाच्यं। ततोक्तलक्षणार्थयस्कवानरहराक्षेपिश्वारूढादिपदार्थयोरभेदभानोपगमाज्जात्यभेदस्याभावेऽवबोधकतापित्ति
तावत्तापिपक्षतिविसाश्रवकताक्रान्तास्वेते इति भावः। अभेदाभावस्य नञर्थसंबंधेनपक्षतिविशिष्टपदार्थसमवच्छेदभावस्याविधेयत्वपाभावाभा
भावेन प्रसज्यप्रतिषेधत्वाभावात्स्वमाधान्यं विधेयत्वं प्रतिषेधप्रधानता प्रसज्यप्रतिषेधे सोक्तिरूपपास्तत्पन्न नञिति प्रसज्यप्रतिषेधलक्षणात्
अर्थैवापयं श्राद्धभोजी च संयपश्यारानुराय इमारे नञःसमासनिविष्टस्याभिन्नार्थकत्वया भिन्नाभेदस्य च विभक्त्यन्तार्थस्य विधेयत्वपानञर्था एम०
भावस्य अभाधान्येन प्रसज्यप्रतिषेधानुपपत्तिरिति चेन्न। वर्हतत्त्वपर्यदासमाव श्राद्धभोजनमपर्युदर्शनरूपक्रियाकर्तृभिन्नाभेदस्य विधेयत्वेनार ८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

शक्तिमत्कर्तृभिन्नभेदस्यतादृशशक्तिमत्कर्तृत्वस्वरूपतयाऽन्वयेऽद्धनभुंक्तेस्वरूपेभक्षितत्पर्यवसन्नोऽसामादिस्थलीयतादृशक्रियाकर्तृत्वाभाववत्स्वरूपविशेष्यपर्यवसाने
नमसत्त्वप्रतिषेधेतुल्यत्वात्तथाचव्यवहारः। अतएवपर्युदासस्थलएवनञ्जन्यस्तुस्वरूपः अन्यथाद्विनामविचारस्यावश्यत्वेन अभावस्यप्राधान्येननञ्समस्तत्व
नञ्समासानार्थक्यापत्तेरितिवदन्तिस्वरूपेपक्षेपिशब्देननञ्समासासहिष्णुत्वंस्वरूपेणप्रयोगतोलक्ष्यपर्यवसानात्तत्स्वरूपेयदिनञ्जोऽन्यसमासेनचेत्स्वरूपपरस्यनञ्शब्दस्यपु
मपदत्वाभावःनञ्स्वरूपेललाटप्योहेतिशक्तयोरितिरेवशास्त्रसंगत्यातुशासनविषयत्वमस्वरूपेपदप्रयोगस्यतत्प्रयत्नेनापपादनीयमनानुपाजेयविषयस्यक्रियायामजि
मेधसंख्याधिकारोत्तरेणसंपत्तामततुपपन्नमसत्तिपतितिति।कर्तृत्वविशेषेणानुपाजेयविजिनजोऽनुयाजेषुपयजामहमंत्रपाठकरणाभावविधिपरत्वेनवि
कृतापत्तेरितिप्रयाजतिपदार्थीसंकोचेनप्रयाजतिक्रियादिनाऽन्यनुयाजेपितन्मंत्रपाठविधानात्विरोधेनराकरणस्यासामर्थ्यापत्तेः।अतिरात्रेषोडशि
ग्रहणायहणयोरिवानुपाजेतन्मंत्रपाठतत्स्थावलम्बवैकल्पिकग्रहणस्यविधायकतयाविरोधपरिहारसंभवेपिअनुयाजजन्यपरमापूर्वस्याभावाभा
वस्वरूपत्वंग्रहणघटितसामर्थ्याभेदकल्पनेनतत्सामग्र्योद्वयमयोऽसंभवकर्पूरोपकर्षकत्वेनवैगुण्यापत्तेरितिसर्वर्थनविशेषनिषेधइतितत्रधर्मस्यनञ्वृत्ति
धर्मावच्छिन्नविषयकत्वनिषेधवाक्यमसत्त्वेतात्त्विकविधायकत्वात्स्यात्तद्धर्मावच्छिन्नार्थकपरस्यनिषेधविषयतावच्छेदकविशेषरूपावच्छिन्नेतरत्ववि
शिष्टतद्धर्मावच्छिन्नपरताघाटस्यार्थःअग्राह्यत्वेणोभयइतितत्रब्राह्मणायदधिस्यविरोधवारणायकौण्डिन्येतरब्राह्मणपरत्वादितिभावः।तत्रापिव्यास

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

१९ रोऽप्यरसाद्यावपि क्वेडिन्मिति ग्रासलुगणान्वयी कौडिन्यभेदेन कौडिन्यापत्ये न स्यादिति यावदस्यार्थः। तथा च ग्रासलुगपदस्य न विशेषणत्वं परं त्वेतदर्थः। वि
19 रुद्धोक्त्यवचनावरुद्धत्वादिति कौडिन्यपदस्याद्युपयोगि वाचकग्रासलुगपदेतरत्वे सत्यर्थोविरुद्धवचनविजातीयत्वे दृष्टवचनं तत्त्वादिति यर्थः। तथा चत्र
नुयोगिप्रतियोगिवाचकपदस्यापि विरुद्धवचनत्वं हिंसाभावननजातस्तु योगिकतत्प्रतियोगिकभेदबोधो न संभवतीति भावः। ननु विरुद्धवचना
वरुद्धत्वेऽपि विभक्तिविभाजकप्रथमान्तादिना विजातीयविभक्तिरहितसमभिव्याहृते भवतीति ग्रासलुगपदार्थे कौडिन्यपदार्थभेदबोधानुपपत्तिरित्य
त आह न सत्विति। इत्यत्रापि राजनि महत्स्य भेदभेदप्रतीयते इत्येनन्नोञ्ज्ञो निमहत्स्यभेदः न महत्तां राज्ञः स्वत्र राजनि महद्भेदेन मतीयत इत्यर्थः। तथा च
+ सामानाधि...पर्यन्त इत्यत्रेवेति व्यतिरेकदृष्टान्तः। यथा च पथा महतो राज्ञः समन्वयः राजनि महत्स्य भेदः न महत्तां राज्ञः स्वत्र राजनि महद्भेदः प्रतीयते। तथा महतो राज्ञ इत्यत्र रा+
वचनसाम्यमपि भेदाभेदबोधे तन्त्रं पेक्षितमिति भावः। गौ कानघ विभज्ये वेति। यथा राजकोनहा विभक्त्यनुयोगि प्रतियोगिवाचकराजकृत्वादिपद
येऽविरुद्धवचनावरुद्धत्वेऽपि समानविभक्तिकतामात्रेणाभेदबोधः तथेत्यर्थः। क्वचं च न समर्थनेऽपीति। क्वचिद्विद्वत्स्थले भेदबोधने समर्थ
तेऽपीमर्थः। घादिशब्दस्य नित्यहिक्वनान्ततया कौडिन्यादिशब्दस्य न निस्येकत्ववनान्ततया। एतादृशविशेषस्थले पि त्वनुयोग्यभिमतप्रतियोगिनो विरु राम.
द्धसंख्यायाश्च विवक्षायां स्थले एव विरुद्धवचनावरुद्धत्वे भेदबोधे विरोधि इत्युपगमेन प्रकृतस्थले विरुद्धसंख्याविवक्षायां कौनक्षा विसेनक्षा १९

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

ऽभिसाशयेनकथंचिद्दिशुक्तो कौडिन्यस्यानेकानेमितदृत्तज्ञाते रेकत्वाविषयस्य यापरंपरया तद्विशेषणात्वेनैकत्वसंख्याविवक्षा वा वासंभवो
वाधः द्वितीयपक्षाद्वितीयकिंपापदस्यान्वयानन्वयप्रसंगात् नाद्यः कौडिन्यभेदान्वयपक्षेऽनन्वितार्थकत्वप्रसंगात् एकवाक्ये किंपापदद्वयप्र
योगाभावादिति भावः अत एवेति विशेषनिषेधस्थले विधिकमप्यसामान्यशब्दस्य विशेषपरतायाश्रुतत्वात् सत्वादित्यर्थः किरणानिषेधवी
तिकुर्वीतेति किंपापदद्वैव्यर्थ्यप्रसंगेनामावास्यायां पितृभ्यो दद्यादिति विधिस्यामावास्यादिपदस्यामामावास्यादिकाले नरात्रावित्यनेन रात्रिभे
देनोपसंहारसंभवात् अपराह्णमावाक्यभेदापत्तेमेन सदोषत्वाद्दृकरणानिषेधपरत्वेपि सर्पिः नविकल्पावकाशः अमावास्यादि रात्रिप्रदृकरणवि
धिनिषेधवाक्ययोर्विरुद्धत्वफलत्वेन निष्फलत्वेनाथकत्वेन रात्रौ कर्मस्यामामारापत्त्रसंगः अमावास्यादिपदार्थे रात्रिभेदस्य नरात्राविति जातं इत्यं सामान्य
येपि अमावास्यादिपदस्य रात्रिभिन्नामावस्यार्थकत्वपाराविधिवाद्दृकरणविधिविषयत्वादिति भावः अमावास्यापदस्यात्रिपदेन उपाधिविशेषावच्छि
न्नमहाकालपरे महाकाले सैव नामावास्यायां सत्रिभिन्नत्ववाधापत्तेः अत्र पितृकालोपाधिविशेषपरेकालोपाधीनामप्यापाधारत्वापगमात्रा
धारसमस्तमनुपपत्तिः एवंतेनैतद्दर्शितं बस्तक्षेदकत्वमेव वाप्रवृत्तेत्ते सप्तम्यर्थः अमावास्या हि रूपकालोपाधपश्चानषष्ठि रुद्राघवस्यापीनित्व
संरस्तत्वस्त्वन्तराणि तथासतिअमावास्यात्मोभेदनियमेन तत्रतत्पदस्यासाम्यावगर्तिकत्वाभसंगात् किंतु अमावास्यापदं वरमो सत्कलारंभकसंयो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२० गनाशानुगुणा क्रियाकलापपरंपरं परंपरा तत्कालारंभकध्वंसाद्युत्पत्त्यर्थं तज्जनकसंयोगानामपि तत्तदारंभकत्वात्तादृशक्रियाकलापानां तद्गता एव
काश्चित्कलावयवक्रियाणां निरूपाः। यतोऽदृष्टपदेशविशेषावच्छिन्नादृष्टप्रदेशविशेषानवच्छिन्नावयवक्रियाणां न शक्तिपदार्थः। अपि तददृष्टप्रदेश
त्तित्वविशिष्टस्वरूपानधिकरणकाल एव तत्तत्कलावयवक्रियाविशेषसाध्यध्वंसाप्रागभावासाकालावच्छिन्नस्याधिकालव्याप्त्या निष्ठध्वंसाद्युत्कर
णाभावस्य प्रमेयत्वापजनकत्वेऽप्यभाविसांनर्गत्तभागविशेषध्वंसाद्युत्कर्षेऽपि तस्य भागध्वंसाद्युत्करणाभावप्रमात्वात्प्रसरायप्रसंगः। नैवं तद्धत्तिप्रसंग
वा स्वापत्तत्तावत् क्रियावच्छ्यापि वस्त्वितरप्रांस्त्यमभावासापदार्थः। अपेक्षणत्क्रियाविशेषान्तादृशक्रियारूपाभावासावच्छिन्नध्वंसाद्युत्करणा
भावस्य उक्तस्थलसाधारण्यात्। यद्यपि दर्शितस्थलेऽपि ध्वंसांतरकालावच्छिन्नासंख्डाभावासाकालसकर्त्वनिष्ठध्वंसाद्युत्करणाभावसावच्छेदकत
या तादृशकालावच्छिन्नतस्याभावविशेषणत्वेऽपि ध्वंतिप्रसंगादुर्वारः। तथापि तादृशाभावासादिनिष्ठावच्छेदकतापर्याप्त्यनवच्छिन्नत्वनिवेशनेन
तन्मते प्रतीकारसंभव इति वाच्यं ध्वंसाभावासायापि तत्प्रमास्थापादितिनिरसविधेः प्रसक्तापपक्षिहाररूपेष्टसाधनताबोधकतयाध्वंसत्तावच्छिन्नत्व
विधिविषयाभावासापदार्थे काले ध्वंसाद्युत्करणाभावे प्रसंगापसाधनत्वावाधात् द्विधाव भावासापरस्य क्रियाकलापार्थकालेऽप्रसंगापजनकता गम०
वच्छेदकं गर्भेऽध्वंसखंडवस्तुं नरूपाभावासापदार्थे तन्निवेशासंभवादिति वेन्न सम्यक् तर्हि ध्वंसाभावासापामिमासिविधौ तावत्कालस्यापि २०

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

वर्त्तंतराशेपे वामावस्यापदार्थः। निषेधविधिस्य रात्रिपदं तादृशामावास्यासाधारणा दृश्यदेशविशेषावच्छिन्नस्वरूपक्रियाविशिष्टकालत्वाव
च्छिन्नपरं तद्विशेषणाविशिष्टकाले श्राद्धनिषेधमहिम्ना चतादृशविशेषणाविशिष्टैव धर्म्मविशिष्टस्य संज्ञवामावास्यापदार्थे श्राद्धकरणं प्रतीयते। वि
शिष्टैवधर्म्मेच विशिष्टावृत्तिधर्म्मतद्विशेषणावैशिष्ट्यं यत्रधर्मिणि तत्रापि तद्वैशिष्ट्यविरहः तादृशापात्तद्विशिष्टावृत्तिधर्म्मवैशिष्ट्यमस्त्येव।
अत एव ग्रहणाद्यद्वीपतान्तरे शौचविनेनदातव्यमित्यतो भेदः सत्या प्रवृत्तिता नियमे नप्रवेशः पिकल्पाद्धि स्तुचितपातस्तन्त्राशौचविशिष्टभेदासत्वेपि
शौचकाले तस्मिन्दानं प्रतीयते भेदः सत्त्व्या प्रवृत्तिता पतेर्विशिष्टभेदः प्रतीतिरेवोपपत्ता ननु विशेषनिषेधस्थले सामान्यविधिस्य सामान्यशास्त्रस्य
विशेषेतरसामान्यत्वाभ्युपगमस्य शिक्षकत्वाभावेपि रात्रिश्राद्धं न कुर्वीतेत्यस्याहीन विकल्पावकाशः। ततएवात्र नानुयाजेष्वितिवन्नञाभेदार्थक
त्वया रात्रिभिन्नकाले श्राद्धं कुर्वीतेत्यर्थकत्वेन निषेधाभावादित्याशंकायां परिहरति नहीति। तत्रापि न रात्राविति अत्रापि रात्रौ तत्र परत्वे तेति। नञ्पद
स्य रात्रीतरार्थकत्वे तदर्थः। ननु निषेधार्थकत्वे तु विशेषः। रात्रिभिन्न इत्यत्र अमावास्यायामितिवत्तत्र न रात्राविति मादृः रात्रिभिन्नकाले दृष्टश्च कृष्णश्राद्धवि
धायकत्वेपि अमावास्यायामित्यादि विधावमावास्यादिपदार्थस्य संकोचेन न तोरात्रिसाधारणेप न श्राद्धकरणलाभ इमावास्यादिरात्रौ श्राद्धानु
ष्ठानप्रसंगस्य दुर्वारत्वादित्यर्थः। इदमुपलक्षणं रात्रिभिन्ने कुर्वीतेति विधानात्सर्वतिथिष्वेव श्राद्धानुष्ठानप्रसङ्गस्य दुर्वारत्वापि बोध्या। नचनापि श्रा

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२१ (21) द्धांतरविधिरपि तु अमावास्यादिविहितश्राद्धे रात्रिभिन्नकालविधित्वात्तेनापमति प्रसंगः इति वाच्यं अमावास्यायामित्यादिना एव कालस्या
भिन्नकालाकांक्षानिवृत्तास्तत्रामध्याह्नकालविधानासंभवात् किं केलेन कालविधाने उक्तातिप्रसंगानिवृत्तेः ननु श्राद्धनिमित्तत्वेन पायामेत्य मावा
स्यादिकाले भागविशेषाकांक्षायाः श्राद्धप्रयोजकत्वेन रात्रिभिन्नत्वविधिरयमित्यतो नामावास्यादिशब्देन वाच्य मावास्यादिरात्रिरहितैव श्रा
द्धानुष्ठानप्रसंग इत्याशंक्य अमावास्यायामित्यादिविधिस्थ मावास्यादिपदात् प्रतीयमाने अमावास्यादौ रात्रिभेदस्यानयं विताननत्तस्य भवः
न रात्रौ क्रियाहिंसा स स्थकुर्वीतेत्यस्यैवेयथार्थ्यं नामावास्यायां पितृभ्यो दद्यादित्यादिना क्रियापात्त इत्यादिवाक्येन संहृतत्वे एकवाक्यताकल्पनं
न युज्यते इति कथं तत्र तस्यान्वयः तद्धि अस्य कुर्वीतेत्यस्य सामर्थ्यकल्पोपगमे वृद्धमावास्यायामित्यादिवाक्यस्थदद्यादित्यादिक्रियानर्थकं
क्रियारहितं च अमावास्यादिश्राद्धकालबोधकवाक्यांतरं नास्ति पदद्वयस्थित्यर्थं कालेन रात्रौ विस्मृततदुपस्थितरात्रिभेदानुपपत्त्यानयेनस्थाद्रं कुर्वीतेति तत्र भाग
बोधश्राद्धकरणान्वये नवसामंजस्यमादिमाहोनरत्र लिंगितात् श्राद्धविधायकं श्राद्धकालबोधकं इदं रात्रौ श्राद्धं न कुर्वीतेति वाक्यमेकवाक्यत्वनामा
मावास्येत्यादिनात्रादृशक्रियारहितवाक्येन सममपसैकवाक्ये न राजद्वास्य संक्रियायास्त्वन्यथा तादृशवाक्यस्य च क्रियाविरहात् क्रियापर्यानवकाशादि एम०
ति भावः न रात्रौ वितस्यत्रैव च तत् क्रियानिर्देशो न स्यात् तद्धि क्रियाघटितामावास्यादिकालबोधकवाक्येन एकवाक्यतोपपत्तौ सामंजस्यं भवेन दृष्टिपतेत्याह। २१

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

नापीरश्मि तिनानुपाजेघिति। नानुयाजेघितिवाक्यं यथा क्रियारहितमित्यर्थः। एतेन किंपावेष्यर्थान्प्रसक्तानानुपाजेषु यजतिषु इत्यनयोरेक
वाक्यतासंभवइतिदर्शितं। नचात्रक्रियायाश्च सत्वेप्यमावास्यायामिसाहित्याश्रयैकवाक्यत्वे श्राद्धकाहिविधेकवाक्यतासंभवाच्छ्राद्धकादिश्राद्धस
राज्ञा वस्तुक्षानप्रसंगभ्रूति क्रियारहिताभिधानमसंगतमितिवाच्यं एकपदोपस्थितस्यानेकवाक्यार्थप्रवेशेबाधकविरहेणामावास्याश्राद्धविधा
पकवाक्यार्थस्याष्टकादिविध्यर्थेपि न रात्रौ विलम्बतदर्थरात्रिपदस्य प्रवेशसंभवादमावास्याष्टकादिश्राद्धकालतत्तद्विधिस्थपदानामनन्वयमतेपि लक्ष
णापरस्यापितरात्रिभेदविशिष्टतत्तत्कालार्थपरत्वापाश्चात्यस्वरूपकल्पनात्। एवंस्मृत्येतेपि न रात्रौ विसेतदर्थरात्रिभेदविशिष्टस्यार्थपरत्वकल्पनसंभवा
त्संसर्गाभावस्य प्रसक्तस्यैव शास्त्रबोधेपि धर्मिणि प्रतियोगिसंसर्गबोधहेतोरिसभिमानेनाशंक्यत इत्यर्थ इति। रात्रिश्राद्धस्य प्रसक्तावित्यत्र मावा
स्यायामित्यादिविधावमावास्यादिपदस्य संकोचे निषेधानुपपत्तेरिति संकोचेन विधितो रात्रिश्राद्धकरणस्य फलत्वबोधोपगम इत्यर्थः। वि
कल्पापत्तिः। विरुद्धार्थकयोर्विधिनिषेधवाक्ययोरेकत्रारोपमारोपप्रसंगः। अत्रप्रसक्ताविति किंकल्पभयेनत्वमावास्यादिपदसंकोचेनैव विधे
रात्रिश्राद्धकरणस्य फलत्वबोधकत्वानुपगम इत्यर्थः। कथं निषेधः कथं न रात्राविति श्राद्धकरणोनिष्टफलत्वबोधः। प्रसक्तं हि प्र
तिषिध्यतेतितद्धर्मिसंसृष्टतयाज्ञातमेव न धर्मिणि तदभावप्रतियोगितयाज्ञाप्यत इत्यर्थः। प्रसक्तस्यैवप्रतियोग्यारोपहेतुत्वमप्रमाणिकं

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२२ कुतः शाब्दबोधेनेष्टसाधनत्वमित्याशङ्क्याह । आसाधीयातीति । त्र्यंबकं मंत्रपाठः । मंत्रपाठतुल्यत्वमपात्र्यभ्युपगतः । प्रसक्तं गृहीत्वा दिमबादः यद्बलात् प्रवास्वलात्
त्वद्भिन्नसक्तिरिति । जलहृदावितादृश उपादीयते । अपेक्षणीयत्तयाडपेयते । ननु यत्र निषेधवाक्यं विना क्रियायां सामान्यविधितः प्रवृत्तिः प्रसज्यते
तेनैव तद्वाक्यं सार्थकं । विधिवाक्यस्य प्रवृत्तिफलकत्ववन्निषेधवाक्यस्याप्रवृत्तिफलकत्वात् एवं च विधाववाक्यस्य विपदस्य तत्रीजर परत्वेन निश्च्या
दृष्टसाधनविषयत्वपातत्राप्रवृत्तिनिर्वाहेन रात्रादि तिवाक्यं व्यर्थं मेस्यात् । न च नांतरिक्षे च अग्निश्चेतव्य इति वेद्दोपयानिःफलः । विधामग्निचयनविधा
नांतरिक्षे अग्निचयनाविधानादेवाप्रवृत्त्युपपत्तेः तत्यतरांशोप्याद्भिमादिरपि निष्फलराव भवतीतिवाच्यम् । सफलत्वसंभवति निष्फलत्वोनौ
चित्यात् अश्रात्वा नांतरिक्ष इत्यादेस्तथात्वोपगमात् । अक्षोनेतु क्रियापदैवेप्य र्थमुपगम्य विधिस्याभार्वस्याादिपदेननरात्रावित्यस्यैकवाक्यत
यातत्सार्थकत्वोपपादनसौवित्तत्वात् । स्तेन पर्युदासमपेक्षनञो भेदरूपमुख्यार्थपरत्वान संभवति । नञो पिप्रातिपदिकतयाप्रातिपदिका
र्थयोर्भेदेननान्वयइतिब्युत्पत्तेः निपातभेदनिवेशमोरवे रात्रद्विराधारमात्रमा । सादिपदार्थभेदस्यान्वयासंभवादिति तोभेदवत्तिलक्षणैवउपगंत
व्या । अयुक्तश्चमुख्यार्थपरित्यागइतिप्रक्तोतेनिषेधपरत्वे वननञस्यापि निरस्तंतात्त्वाक्यसार्थक्यानुरोधेन लक्षणाप्रयोगेमेचित्यात् । प्रातिपदिकार्थे राम०
नैवधात्वर्थेनापिप्रातिपदिकार्थस्यभेदेनानन्वयात् । नञः प्रतिषेधपरत्वेपिनञकुर्वीतेत्यत्रधात्वर्थस्याद्धकरणेनञाइष्टसाधनत्वाभावबोधकत्वासम्भवा १२

त्वोऽस्यमेहानयात्तु नोधेन तत्स्याभाववत्तित्वस्य रागप्राप्त्यावश्यकत्वाज्ज्ञामसत्त्वं हि भवति विध्यते इति भवादृस्यापि पत्र निषेधं विना न तत्क्रियायां प्रवृत्तिप्र
सक्तिस्तेनैव निषेधस्यार्थवत्त्वमिति भावार्थः। पत्तुप्रवृत्तिबंधयस्थेऽपि विधिस्यामावास्यादिपदंनं रात्रौजप र रमेयेन निषेधं विनापि रात्रिश्राद्धे प्रवृत्तिप्रसक्ति
र्नस्यादितिनिषेधवैयर्थ्यं स्यात्। नन्वेवं प्रसक्ति विकल्पोऽपि निषेधविरोधेन सामान्यशास्त्रस्य रात्रिश्राद्धांशे सफलेत्वसंसर्गबोधकत्वानुपगमात्। नन्वत
या प्रसक्ति कथं प्रवृत्तिप्रसक्तिरिति वाच्यं। त्वसंसर्गाग्रहस्य प्रवर्तकतामते संसर्गाग्रहेऽपि प्रवृत्तिप्रसक्तेः न च सामान्यशास्त्रस्य सत्वनेकांसंसर्गाग्रहसहि
तधर्मिधर्मिज्ञानरूपभ्रमजनकत्वेन तद्विरोधिनं निषेधवाक्येन तत्संसर्गाग्रहजननात्संभवान्निषेधस्यापि कथं निवर्तकतेति वाच्यं। निषेधवाक्यस्यापि
सामान्यशास्त्रीयस्यापि बलीयस्त्वासंसर्गविषयकत्वरूपप्रमात्वकल्पकतया प्रवृत्तिविरोधित्वात्। अत एव बलीयसमदृष्टं बलवद्बाधमतइति न्यायाद्वा
गतः प्रवृत्तिप्रसक्तिविषये त्वगम्यागमनादौ निषेधवाक्यस्य बलीयस्त्वाल्लौकिकमानबाधकतया निवर्तकत्वमेवान तु विकल्पः। एवं च पशुयागस्य
धारापराभागांशे प्रागप्रसक्तताबोधकातिदेशवाक्यस्य धारापराभागनिषेधकस्य नैकोपदेशो भवतीति वाक्यस्य धारापराभागनिवर्तकत्वेऽपि प्राप्तातिदेशवाक्य
स्य वैकल्पिकत्वं न विकल्पः। षोडशीग्रहणाग्रहणवाक्ययोस्तुल्यबलतया बाध्यबाधकभावासंभवाद्विकल्प इति। तत्र सामान्यशास्त्रस्यैवोपजीव्यत्वेन
बलवत्त्वेन बाध्ययोगाद्विकल्पे पर्युदासपक्षावलंबनस्य युक्तत्वादित्याशयेनाहनि षेधेति। निषेधबोधकवाक्येत्यर्थः। तात्पर्यानवबो

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२३ षेति । निषेधवाक्यास्त्वेवि विधिवाक्यस्य सामान्यस्यादिप्रदस्परात्रीतरामावस्यादि पराजय्याहकर्मभमाणाभावेन रात्रिश्राद्धे पि इष्टसाधनताभावः
सामान्यपक्ष्याग्रहीतामावास्यादिपदघटितवाक्येनेबाधसंभवात्रिश्राद्धप्रवृत्तिप्रसक्त्याप्रवृत्तिवारणायैव निषेधप्रयोजनत्वादित्यर्थः ॥
केचित्तु रात्रिश्राद्धं न कुर्वीतेत्यस्य क्रियापदे पर्युदासभयेनामावास्यापापितृयादि विधेर्भकवाक्यता संभवे पिब्रमावास्याष्टकादिश्राद्धविधायवाक्ये
पुत्र्यमावास्याधैनेकपदानां रात्रिभिन्नामावास्यादिनारूपणासीकारम्पेक्षा निषेधवाक्ये रवश्राद्धकालसामान्यबोधकशब्दमंतपदाध्या
हारोयुक्तः तथा च नञः पर्युदासार्थकत्वयाश्राद्धमिमितमतत्कालेषु रात्रिभिन्नत्वरूपविशेषणस्यैव विधिरूपं पारंवैचैतद्वाक्यात्रात्रिभिन्नकाल
तेन श्राद्धं जमामीर्द्वर्वसामामेरात्रिभिन्नकालहेतुत्वलाभेन रात्रिकृतश्राद्धे स्वर्वस्वरूपफलानुपधायकत्वग्रहात्र रात्रिश्राद्धकरणप्रसक्तिरितिय
र्युदासपक्षे परिष्कुर्वेति । यत्र नञः पदेनान्वितिस्वपितु न कुर्वीतेत्यत्राचार्थकं वर्जयेदित्यादिक्रियापदं यथा यत्प्राप्यनेहरौ शुभमेसम्यक्कर्मणि
वर्जयेत् इत्यादौ तत्र न कुर्वीतेत्यादौ नो यथा रात्रिश्राद्धादि करणे विध्यर्थेष्टसाधनताभावबोधस्तथा तत्क्रियापापिष्टसाधनताभावबो
धेन संभवति । अपितु धातर्थक्रियाइष्टसाधनत्वमपि बलिष्ठाप्रसाप्यात तथा च नञ्श्रवनादिकालकृतपुण्यरागीयागादीनां निष्फलत्वा राम॰
नुपपत्तिः तद्करणस्य प्रसवायाभावरूपेष्टसाधनतासंभवेन तत्करणं प्रसवायमप्रावहीरत्यत्र सम्मामाधिः श्रितनीयः । नन्वविधिनिषेधस्य २३

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

लेविध्येर्निषेधविषयेतरविषयकत्वे विकल्पस्य स्थलेमेवं दुर्लभमित्याशंक्याह अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति विकल्प
स्थलस्य प्रकृताद्विशेषं दर्शयति अत्र एकविषयतया एवरिति। एकरूपावच्छिन्नातिरात्रविषयकयोर्विधिनिषेधवाक्ययोः प्रकृतत्वादिवार
त्रिविषयकत्ववद्विभिन्नविषयकत्वासंभवेनेत्यर्थः। षोडशीग्रहणाग्रहणे इति। गृह्णाति न गृह्णातीत्यनयोरतिरात्रे विरुद्धयोरपि षोडशीग्र
हणातद्ग्रहणयोरंगतया विधानमेव पाक्षिकत्वमित्यर्थः। राजानमिवयाजिका उत्पन्नचंद्रवान् भक्षशतशाशस्पेव षोडशकलावत्त्वेन चंद्रबोधकषोडशीश
ब्दस्य तच्छक्त्या शक्तः सोमपदवाच्यत्वरूपशक्त्यंतर्बंधरूपलक्षितलक्षणया सोमलतार्थकत्वात्तयोर्ग्रहणाग्रहणयोरविरोधात। अपित्वग्रहणज्ञा
नीयवाक्तिद्वयागता नातिरात्रे इति वाक्यस्य प्रकृते अतिरात्राद्वन्यकरणे इत्यतिरात्रे षोडशीग्रहणं इष्टसाधनत्वाभावार्थकत्वेन तस्मात्सनातिरात्रे
गृहीतानिर्वहतीति ग्रहणाविधिना तत्रेष्टसाधनत्वबोधादेकत्र प्रामाण्यं च स्यादिति प्रकृताद्विशेषमाह। अन्नवेतीत्यत्र नातिरात्रे इत्यादिवाक्ये
ग्रहणविधिविरोधादिति ग्रहणविधिविरोधार्थविरुद्धार्थकत्वात्तत्र प्रसंगादित्यर्थः। तथा च विरुद्धार्थकवाक्यद्वयस्य मानान्तरेणानुपपत्त्या एकवा
क्यस्याप्रामाण्यं स्यात्तानन्ववेदवाक्यस्य प्रामाण्यमपि भवितुमर्हतीति भावः। इष्टसाधनमितीति। अथ यं सुखमुपकर्षेज्यादिष्टं चान्नातिरात्रेत्वंपरमापूर्वमान
तु नञ्ज्ञमप्रधानफलानां गतावविरोधात् तदीयप्रधानफलाजनकत्वस्य तदंगताघटकत्वादिसंग्रेयक्तीभविष्यति। ननु एवं विधिप्रसपार्थेष्टसाधने

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२४ तस्य क्रियानन्वयित्वेन क्रत्वर्थान्वितस्यार्थत्वस्यासत्तिविरोध इत्याशंक्य नञर्थद्वारा क्रत्वर्थान्वितत्वेन नञर्थादृशश्युपपत्तिर्भइत्याह सुसन्नन्वेति भा
24 त्वर्थस्याभावपीति प्रत्तियोगितयाधात्वर्थान्वितेन नञर्थाभावेपी तदर्थः विभक्त्यर्थानवच्छिन्नोद्देश्यान्वयः प्रभाकरादिसमर्थमादुरित्यनेनास्य संबंधः
कलंजभक्षणाभावविषयं कार्यमिति एतादृशार्थभानेन तन्मते सिद्धविध्यर्थकार्यसमभक्षणान्वितेन नञर्थाभावेन महानयादुपदिष्टमसंगतिः
नन्तत्स्य भिव्यास्कृतविधि भक्ष्येनफलविरहभक्त्वाप्रफलासंबंधेनइष्टसाधनत्वभवत्याप्यत्तोयथाना तिरात्रसाद्र। फलविद्धतत्संयत्ति योगि जपात
भसाप्यते यथारानौषोडशिंग्रहं ग्रहणं कुर्वीते इत्यादौ इत्यत्र किं नियामकमित्यां तद्दशंका यामाह। नियमस्त्विति। तात्पर्यम् इत्यादि नायोप्पत्ता परिग्रहः शेत्रो
न५ षोडशिनं गृह्णीते इत्यत्र रात्रिषोडशिकरणाभावस्य फलजनकत्वबाधेन कलंजेकत्वाभावरावत्तासंपर्कैकल्प्यते। नातिरात्रेगृह्णाति षोडशिग्रहण
स्येष्टसाधनतापायहरणविधिनाबोधनात्तत्राभावस्येष्टसाधनत्वरावत्तासर्पमिति भावः नन्तु अंगविधिभिः कथमिष्टसाधनत्वं बोधनीयं फल
वत्संनिधावफलं तदंगं इत्यंगलक्षणेनांगानां निष्फलत्वावगमादिति शंकांगलक्षणे फलसामान्याभावरूपा फलत्वनिवेशाभिमानवि
जं भितां निराकरोत्यन्य उपेति। अंगलक्षणेत्र फलपदस्य मुख्यफलाजनकत्वार्थकत्वपात्तादृशनिः फलत्वमतेपि परमपूर्वरूपफलजनक एम०
त्वबोधना विरोधादित्यर्थः अन्यथांगे महत्त्वमनुपपत्तेरिति भावः अत एवपागेरागाद्दौ वैधीति प्रवादोपीति भावः इष्टप्रयोजकत्वरूपइष्टसा २४

ध्यनत्वस्य विध्यर्थत्वे प्रधानफलरूपेष्टसाधनत्वबोधनमप्यविरुद्धमिति बोध्यं । नन्वेषोडशिग्रहणं विनापि तदभावागकातिरात्रात्परमा
प्तिर्वीसंभवेन षोडशिग्रहणे परमाप्तिर्वह्निरूपेष्टसाधनताबोधेपि प्रकृतमनुपपत्तिः । तज्जन्यमप्रमादो वलवद्द्वेषसंभवादिति साशंकां फलभूमानमप्यु
पेत्य समाधत्ते । ग्रहणविध्यमर्थानुपपत्त्येति । ग्रहणविधेः प्रवृत्तिपरत्वाभ्यथानुपपत्तेरर्थः । अतिशयितं । अतिशयरूपजातिविशिष्टं प्रधान
फलेऽतिशयविशिष्टे स्वर्गोऽयसंदेहे परमाप्तिर्वेत्यतिशयरूपजातिविशिष्टसाकारे पितत्वोत्कटरागासंभवेन षोडशिग्रहणजन्यप्रमादो नव
लवद्द्वेषतिरस्कारश्च सतः प्रधानफले प्रकर्षस्यापि कल्पना माहात्म्यं स्याद्वेति । अतिशयितपरमाप्तिर्वेत्यस्यार्थः । फलेऽत्यतिशयं प्रधानफलमक
ल्पनमिति । तथा चतादृशफले उत्कटरागात्तज्जन्यकातिशयितपूर्वेपि उत्कटरागोदयेन तज्जनकषोडशिग्रहणजन्यप्रमादो वलवद्द्वेषति
रस्कारेणानन्यप्रवृत्ति निर्वाहः इति भावः । अत्र च वाकारसत्वेपि विकल्पस्य निर्वाहः । तद्धि यथापयः कलयोरन्यो न्यजन्यफलविशेषितानर्थोरेवंवि
रुद्धकल्परूपविकल्परूपता । व्रीहियवायोः प्रत्येकमपि तयोरपि फलजनकत्वसंभवे न तत्र तन्निराकरणापत्तयोः फलत्वेनैपरस्पराभावस्य ह
कारिता ममप्रमाणाभावरूपकं तत्र वाकारं विना न संभवतीति व्रीहिभिर्यजेत यवैर्यजेतेत्यादौ वाकारोनस्पृष्टपते तत्रापि
तत्कल्पत्याऽन्वय च कल्पयोर्भावाभावपररूपतया विरोधेन मिलनासंभवादेकस्यापरकारणाभावेति स्वेपकतत्पान्त्वन्यन्यफलविरोधितापात्रयः

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२५
25

तोलामान्नवाकारांशेष्वाास्त्रयव्रीहियवयोर्विकल्पस्थलेवाकोरेणाप्यागत्यकोपेन्द्रीहियवयोः परस्पराभावसाहित्येन कारणतावगमस्तापनात्सं
भवः।एकस्यापि यागस्य देवताद्वयकल्पनागत्यसंभवापाशविषयपुरोडाशरूपद्रव्यनिष्पत्तिद्वारा व्रीहि फोभय साध्यतां समभव्यातरानवसर्ग
प्रतिव्रीहियवाप्राय यवयागयोः परस्पराभावसाहित्येनकारणताव्वाकारवशात्प्रतीयते इत्यपि सम्यक्।तथाहि व्रीहियागयवयागयोरिव
विरुद्धकल्पद्वयरूपत्वयागक्रमेण यागद्वयकर्तुः सर्गतिमाहत्म्यसंगाज्ञ्यपेक्षेपजितत्वसमाश्रयागे कारणीभूतव्रीहिरूपद्रव्यलाभे कृष्या
कांक्षायानिवृत्तावपि विकल्पप्रसक्त्याद्वाकांक्षयाय वरूपद्रव्यविधायकतापामीमांसकसिद्धांतसिद्धायाभंग प्रसंगाद्वाशेते नगुरुमते
प्रधानविधेरपि यागजन्ये न प्रपूर्वबोधकत्वपाश्चपूर्वप्रेसवव्रीहियवयागयोः परस्पराभावसाहित्येनकारणत्ता वाकारसमभिव्याहार
वशात्प्रतीयते।एकैकेनचरकस्य यागद्वयानुष्ठानासंभवः।क्रमेणैकयागद्वयानुष्ठानस्यपिं चरकद्वयतपोरसंस्तनक्रमेणापूर्वद्वयोत्पत्तौ तावा
धकाभावः।अपूर्वे यागस्यसमाश्रयकारणतावत्समाश्रयेदेवप्रतिबंधकत्वादिसत्पि निरंकाविधि प्रत्ययस्यापूर्वं वाचकत्ववादिनेप्यापिकभेत
अपूर्वे यागयोर्वैकल्पिककारणत्तायाविधिवाक्यतोऽप्रतीतेश्च।एवं वाकारेणाकारणायाव्रीहियवयोः परस्पराभावसहितत्वमनाप्यते राम०
इंद्रजलकाहायवटइत्यायप्रयोगात्ताद्वीत्य समवहितपवस्यकारणतालाभादेव चप्रीत्यसमवधाने कथं यागस्यकारणतापवाविधुपस्था २५

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

पकार्कास्त्राभ्यां शांतिः ॥ ननु परस्परार्भविसहकृतत्वं तत्र कार्थः ॥ तृणारण्योर्वा वह्निं प्रति तेरमादि प्रयोगसत्वात् न हि तृणारण्योर्भिः परस्पराभाव
सहकारेण वन्ह्यादिकार्यं जनयेतां मिलिता इ पिंजादशकार्यो सत्वेः ॥ तत्र यावत्कर्य व्रीहिप्रयोर्मिलितयोः शास्त्रार्थता इति चेत् ॥ मैवं व्रीहि
यवैर्वोपजनितरस्य तोव्रीहिकरणकत्वयवकरणकत्वयोर्यागविशेषणयोर्यागनिष्ठस्वर्गसाधनतावच्छेदकत्वं प्रतीयेते ॥ एकविशिष्टत्व
परस्य विशिष्टबोधकशब्दस्य धर्मिविशेषणे विशेषणांतरावच्छेदकत्वबोधकतापाद्युक्त इति सिद्धत्वात् ॥ अतोऽसंसर्गे किंपि विशिष्टान्वयसंभवाति
तोपलक्षितान्वयतास्य पक्षिलस्मात् ॥ एवं च व्रीहिकरणकत्वयवकरणकत्वयोः कल्पयोर्यागनिष्ठस्वर्गसाधकतावच्छेदकत्वरूपस्य
गेप्रयोजकत्वे न विधायकतात्पर्यं वाक्यद्वयमतयोस्तत्प्रयोजकत्वं च न मिलितयोः ॥ एककरणकत्वान्वपि न यावान्न मिलितयोर्गेत्वस्य करण
कत्वाभावस्य वाक्यारणविधानात् ॥ तस्यापि स्वर्गसाधनतान्वयियागविशेषणतया तुल्यभावेन एककारणकत्वस्य प्रयोजकसंसर्गेत्वप्र
कारणकत्वाभावस्य प्रयोजकत्वलाभात् ॥ अतः कल्पयोर्विधेन विकल्पतावाकारकल्पनवीजं च व्रीहिस्वकरणकः स्वर्गसाधनं व्री
हिप्रागजातीयः प्रागः ॥ किं च व्यक्करणकइत्याहरपाक्किलमुख्याव्रीत्यकरणकत्वविशिष्टकरणांतराकीसापात् तद्विशिष्टकार
णांतरस्याभेदेनैव निरूपे तद्विशिष्टकरणांतरबोधकत्वस्य तद्बोधकवाक्यारंभस्य तरेणाप्युपपत्तेः ॥ तृणारण्योर्वा वह्निं प्रति हेतुत्वे रेफसंदेहप्र

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२६ 26

माणवाक्यवद्राक्कारणस्याप्यत्वाभ्यपि निवारकारेणापरसाध्यत्वाभावद्बोधेनापि तदभावस्यागमाउपलक्षणात्तैयैवभाने तात्पर्यमुपेयपत्तेन
नुविशेषणात्तयाजन्यानो मिलितत्वाभावमपित्तत्कारणाभ्यांजनितेन वन्हिना पाणाकादि कार्यजननसमामाऽन्यथा कृतयाराकसाध्येन
कार्येऽपरसाध्यत्वाभावप्रयोज्यत्वावधारणात् । अथैतदोपजतिसमिधोयजतिइत्यादिविधिवोधितानामंगानांकथंन विरोधिता तत्रापि
प्रथमांगविधित्तोऽङ्गकांक्षानिहत्तायथविधिवद्विकल्पमुख्याकांक्षयेवविध्यन्तरप्रवृत्तेः वाक्यार्थकल्पनायाआवश्यकत्वात् । तदुक्तौ
क्तौगसमवधानाभावरूपवाक्यार्थविशिष्टस्येवापहगस्यपरमापूर्वसाधनताचगमात् । विशेषणीभूतस्याभावस्य फलप्रयोजक
तायाआवश्यकत्वात् इतिचेत्तन्न अंगानांपत्रक्रमः श्रुतः तत्रांगविकल्पासंभवेनमुख्यविज्ञानामनेकेषांमंगत्वदर्शनादेकांगलाभेपिकि
ममस्याभित्यंगान्तराकांक्षायेवाहृतीयादिविधीनांप्रवृत्तिसंभवेनविकल्पमुख्याकांक्षायास्तुत्यापकत्वाउपगमात् । तथासतिपरस्परा
भावस्यापेक्षताकल्पनेनगौरवात् । तानेवैवमग्रभागस्तमितभोदयान्मूत्सर्जीकामितिविधिवोधितयोःपरमस्याधिकरणकश्राद्धांग
योरग्रभागदानमूलदानयोर्विकल्पोनस्यात् । विकल्पमुख्याकांक्षासामंतोरणी रउक्ताकोस्यपामूलदानविधिसंभवादितिगंबांतयोरास्त राफ
मिस्तामिनमूलस्यहरंतिपितरोञ्चल्यादिसमर्थवाद्वोधितहवणनिह्रजिह्वासम्भाव्यांगत्वारग्रभागदानमात्रेगाहपत्याग्निशंतिसंभवात्हवणनिवर्त्य २६

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

कृतपातन्तु लाभे हरणानिवर्तकान्तराकांक्षापायाश्चत्रुटेयेनविकल्पमुखैर्वाकांक्षापायश्लिष्टानविधिप्रवृत्तेः प्रकारस्यविकल्पार्थकतायाञ्चावश्य
कत्वात् । नचतथापित्वविकल्पानुपपत्तिः प्रतेोऽग्रदानमूल्यदानयोः क्रमेणाविधानोपगमेनावप्रथमविधितो । अथ दानस्य हरणानिवर्तकत्व
लाभे स्वतन्त्रनिवर्तकाकांक्षायाः पूरणादिकल्पः संभवेतरेवनिष्प्रपत्ताशुगपत्तत्रतु द्वितोऽभयदानविधानेवाधकाभावादितिवाच्यं अग्रदा
नमूल्यदानयोः संभवदानमतिनियमेनाग्रदानत्वमूल्यदानत्वावच्छिन्नयोः पृथक्संभवदानान्वयानुरोधेनकाकाभेदस्यावश्यकतया युगपदुभ
यविधानासंभवात् । अथैवंपत्रभववच्छिन्नदानस्यदितिच्छिन्नदानत्वावच्छिन्नयोः पृथक्दानकण्ठपरिष्करणकल्पान्वये तात्पर्यमस्तु तत्राकांक्षाभेदेनसामर्थ्यवि
रहाद्रव्यस्यदिशेदानक्रमकारणाभ्यां छिन्नातीतिप्रयोगानुपपत्तिः समासासंभवादिति चेन्न भवत्संवृत्तयातात्पर्यग्राहकशब्दप्रयोगः । यत्र छिदात्वरूपैक
धर्मावच्छिन्नायामेवभिन्नवृत्तौ उपपद्यते कर्मकत्वदानकरणकत्वयोः खदिरकर्मकत्वकुठारकरणकत्वयोश्चान्वयितासर्वथा तत्रैवतथाप्रयोगः । अ
स्तेव भक्षामिपित्राद्युद्देश्यकत्वविशेष्यतावच्छेदकतापन्नाग्रभागदानत्वादिनाप्रकृतिनिर्वाहापापभागदानता स्वरूपविभिन्नधर्मावच्छिन्नेपृथक्
संप्रदानान्वयस्यावश्यकतेत्यलमप्रस्तुताधिकाधिकविचारेण । भूतलेनघटः भूतलेनघटस्यापीत्यादौ प्रतियोग्यभावपाः प्रतियोग्यनुयोगिभावस
भूतलेनघटः नयत्तिचेत्संसारावभासाधारयोश्चाधाराधेयभावस्य संसर्गतयाभानं नन्वत्र प्रातिपदिकार्थयोर्नभेदेनसाम्यान्न

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

२७ यइतिव्युत्पत्तेर्नोनिपातातिरिक्तत्वस्यप्रातिपदिकविशेषणतयानानुपपन्नमित्याह प्रतियोग्यभावयोरितितद्विशेषणप्रवेशः प्रयोजकंवांतरतुरो
२७ धेनत्वावच्छेदकइत्यत्राह अन्तरंगेतिपदेतो निपातार्थस्यप्रातिपदिकांतरार्थेनसाक्षाद्भेदेनान्वयोनानुपपन्नः अतएवतमर्थः इवाद्यर्थान्वयइतित्वं
द्रइवमुखमित्यादौसादृश्यप्रतियोगित्वयोगिनोश्चंद्रमुखयोः प्रतियोग्यनुयोगित्वभानमर्थः नच अर्थापत्तेरितिप्रतियोगिपदेऽन्तरंगसंबंधात्रानुयो
गिपदेऽतंरंसत्त्वम्पापत्तनापत्तेस्वर्थः तद्योः सादृश्यरूपनामार्थेनसाक्षादन्वयेप्रतियोगित्वादेः प्रकारताया उपगतत्वात्तत्रोपस्थापकवच्छा
दिविभक्त्यपेक्षासाहितिभावः ननेवं घटंप्रतत्वमित्यादिविद्धत्रीहौसमासेऽप्याद्यार्थस्याजन्मस्येवमुख्ययोनतद्यापार संतानोमामावयोरस्वा
धात्तासंबंधेनप्रतिलक्ष्यादाव्वचप्रसंगेवक्तव्यासंतामोमाभावत्वेनधर्मिणोर्ज्ञानेऽसत्स्वरूपासर्वसिद्धांतेवितादसत्त्राह अथयटमितिमामानाधिकर
रणादेरोधादिति एकधर्मिबोधकत्वातोर्थादिसमर्थः अमथासमानलिंगकत्वएकवचनत्वानुपपत्तेरित्यर्थः अन्तरम्यमवर्धमेलस्यगांविनात्वमपरार्थी
बोधकत्वेनतद्वहीस्त्वनुपपत्तिः अभावार्थकत्वेनाव्ययीभावायत्तिरेष्टव्याउक्तव्युत्पत्तेर्नोनिपातातिरिक्तत्वविशेषणमप्रसिद्ध्यैवषष्ठ्यादिविभक्तिमत्तरेणाव
मतियोग्यनुयोगिभावादिभानमुपपादयतोमतमुपन्यस्यतिकेचित्त्विति घटपइति घटोनास्तीत्यादौप्रथमाविभक्तेर्नञ्पदजविसर्गादसमत्वमादिविभ एम०
क्तेरित्यर्थः प्रतियोगित्वइतित्वाघेयतासंबंधेन विशेषणीभवतः प्रकृत्यर्थस्यविशेष्यत्तयानिरूपकतासंबंधेनत्वाभावविशेषणत्तयाभासमानइ २७

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

स्यादित्याद्युक्तत्वस्वामित्वादेः षष्ठ्यर्थत्वावच्छिन्नाधीनमतानुसारेण सर्वत्र समसम्बन्धे त्वग्निमस्य लक्षणे तत्सम्बन्धः स्वमतानुसारेणाह ह्यनुयोगित्वेनेति नि
रूपकत्वसंबंधेन विशेषणी भवतः प्रकृत्यर्थस्य विशेष्यतापाद्याप्रयत्ताः संबंधेन वाभावविशेषणतापाभासमानमित्यादिः। यथा स्वामित्वादेः षष्ठ्यर्थता
मते नैस्वैत्रस्यादित्यादेः निरूपकतासंबंधावच्छिन्नाभाववोधे स्वत्वोपपत्तये तादृशसंबंधस्य चाभावप्रतियोगितानवच्छेदकत्वया सामञ्जस्यात्। तथा च न
यदेनैस्यादेः प्रतियोगित्वस्य स्वर्थतामते न काचिदनुपपत्तिः। नञर्थाभावानुयोगिकप्रतियोगितावच्छेदकपदोत्तरविभक्त्यर्थाभावस्य नञा बोधनात्॥
नैस्वैत्रस्येतिवत्तादृशाभावतात्पर्येणाद्य यदेनैस्य प्रसज्यात्। अत्र प्रथममते त्वस्वरसो नास्ति परंतु अनुयोगित्वस्यापि उक्तस्थले स्वर्थतासंभवतीस्य
स्य स्वर्थताकल्पनानुसरणात्। एतावता नञर्थप्रतियोगिनः साक्षाद्विशेषणत्वनिराकरणस्मृतं तत्र न घटः न पचति चैत्र इत्यादौ नञर्थस्यानुयोगिनि
भेदेन साक्षात्तथात्वनिराकरोतीति नञनुसरस्येति। सुपङ्स्तनुपसर्गेत्त। निपातान्तरविभक्तेर्निरर्थकत्वमतानुसारेणाह नञो वेति। असाववति लक्षणेति।
तथा च नञर्थेनानुयोगिनोऽभेदान्वयइति भावः। न च निपातात्तरं प्रथमाविभक्तेरेव सर्वत्रोपगमात् तन्न घट इत्यादावभेदान्वयस्य नञ्पदस्योपस्थापनः स
मानविभक्तिकत्वेपि नानुयोजेषु पञ्चतिष्ठ इत्यादौ नञः समभिव्याहृते विशेषणापञ्चमादिपदसमानविभक्तिकत्वाविरहात् तदर्थस्याभाववत्तायञ्जमादौ च
भेदेनान्वयासम्भव इति वाच्यं। निपातोत्तरं सर्वविभक्तिसाधारण्यमताश्रयत एव स्वरूप्तकारकादिस्थापि यामे वर्गं घटइत्यादौ वैवकाराणान्तरसमभिव्याहृतस्य च्छेद

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative

न्काप

२८ वोधो ही धिति कौते वाभिहितः चैत्रो न पचति इदं न राजतम् इत्यत्र प्रतियोग्यनुयोगिभावसंसर्गेण विभक्त्यर्थविशेषितभेदस्य बोधः कथं नञा पदेन । क
थं वा भूतलं न घट इत्यादौ घटादिसंसर्गाभावबोधः नञर्थाभावे घटपदोत्तरप्रथमापदार्थप्रतियोगित्वस्य नञ्पदोत्तरप्रथमापार्थाभावा
धारत्वस्य भूतलादौ बोधनसंभवादिति तत्राह । विभक्त्यर्थेति विभक्त्यर्थनिष्ठाभावस्य मानविभक्तिकपदार्थयोः संसर्गाभावस्यैव बोधने नञो
न सामर्थ्यमिति अर्थः असामर्थ्यं च तादृशप्रतियोग्यनुयोगिवाचकपदार्थं नञ्पदसमभिव्याहारज्ञानस्य तादृशफलानुसारकत्वया तत्र तत्कारणता
नुपगम इति भावः । आद्यादित्यस्य सम्मतचनायत्त्वात् प्रथमाविभक्त्या संख्यातिरिक्तार्थबोधनेन तस्या असाधुत्वापत्तिरिति ॥ ॥इति श्रीमहामहोपाध्या
यगदाधरभट्टाचार्यकलितनञ्वादटिप्पणी समाप्ता ॥ ॥श्रीरस्तु लीलाधामपदानामक्षरामरामस्वरूपमहर्षिर्भवशांतिस्तदाकुनपामद्वामवसज्जनम् ॥

९८

रम०
२८

CC-0 Dharmartha Trust J&K. An eGangotri-Vaidika Bharata Initiative